# KERALA READER SANSKRIT

(Academic Schools)

## Standard IX

1963

1962

T38
K45

8
5

This Book Has Been
Donated By

Fr. A. Thannippara

# संस्कृतपाठावलिः

(पञ्चमी)

१९६३

DHARMARAM PONTIFICAL INSTITUTE
LIBRARY
BANGALORE.

Price: ~~85 nP.~~ 1-10

Raja Press, Tripunithura.

J. P. I. LIBRARY
Acc No. 10035
Call No. T38/K45

# PLEDGE

India is my country, all Indians are my brothers and sisters.

I love my country, and I am proud of its rich and varied heritage. I shall always strive to be worthy of it.

I shall give my parents, teachers, and all elders respect and treat everyone with courtesy. I shall be kind to animals.

To my country and my people, I pledge my devotion. In their well-being and prosperity alone lies my happiness.

©

The Government of Kerala

1963

## विषयानुक्रमणिका ।


| पाठः | | पृष्ठः |
|---|---|---|
| रघुवंशमहाकाव्ये सप्तमः सर्गः (सटीकः) । | | 1 |
| १. | श्रीकालिदासः । | 34 |
| २. | श्रीरवीन्द्रनाथठक्कुरः । | 39 |
| ३. | लव-चन्द्रकेतुसंवादः । | 44 |
| ४. | विष्णुभक्तोऽम्बरीषः । | 47 |
| ५. | सुभाषितानि । | 51 |
| ६. | नवरात्रमहोत्सवः । | 54 |
| ७. | महामनस्कश्चारुदत्तः । | 58 |
| ८. | सुभाषितानि । | 64 |

## रघुवंशमहाकाव्ये सप्तमः सर्गः ।

[महाकविः कालिदासः दिलीपस्य रघोश्च चरित्रमुपवर्ण्य, रघुनन्दनस्य अजस्य कथाकथनप्रस्तावे, अजस्य भोजभगिन्या इन्दुमत्या सह विवाहं वर्णयित्वा, इन्दुमत्या सह तस्य स्वपुरीयात्रायाः प्रसङ्गे, इन्दुमत्यलाभेन प्रक्षुब्धैरसूयालुभिर्नृपैः सह सञ्जातं रणं च सप्तमसर्गेण वर्णयितुमुपक्रमते "अथोपयन्त्रा" इत्यादिना ।]

अथोपयन्त्रा सदृशेन युक्तां
स्कन्देन साक्षादिव देवसेनाम् ।
स्वसारमादाय विदर्भनाथः
पुरप्रवेशाभिमुखो बभूव ॥ १ ॥

**अथेति**— अथ स्वयंवरानन्तरं विदर्भनाथो भोजः सदृशेन उपयन्त्रा वरेण युक्तां साक्षात् प्रत्यक्षं स्कन्देन गुहेन युक्तां देवसेनामिन्द्रपुत्रीं तत्पत्नीमिव स्थितां स्वसारं सोदरीमिन्दुमतीमादाय पुरप्रवेशाभिमुखो राजधानीं प्रवेष्टुमुद्युक्तो बभूव ॥ १ ॥

सेनानिवेशान् पृथिवीक्षितोऽपि
जग्मुर्विभातग्रहमन्दभासः ।
भोज्यां प्रति व्यर्थमनोरथत्वाद्
रूपेषु वेषेषु च साभ्यसूयाः ॥ २ ॥

**सेनेति**--भोज्यां भोजपुत्रीमिन्दुमतीं प्रति व्यर्थमनोरथत्वाद् रूपेषु वेषेषु च साभ्यसूयाः असूयया सहिता वृथेति निन्दन्तः विभातग्रहमन्दभासः प्राभातिकचन्द्रादिवन्निष्प्रभाः पृथिवीक्षितो राजानोऽपि सेनानिवेशान् शिबिराणि जग्मुः। 'गम्' धातोर्लिट् ॥

**सान्निध्ययोगात् किल तत्र शच्याः**
**स्वयंवरक्षोभकृतामभावः।**
**काकुत्स्थमुद्दिश्य समत्सरोऽपि**
**शशाम तेन क्षितिपाललोकः ॥ ३ ॥**

**सान्निध्येति**-- तत्र स्वयंवरस्थाने शच्या इन्द्राण्याः सान्निध्ययोगात् सन्निधिरेव सान्निध्यं तस्य योगात् सद्भावाद्धेतोः स्वयंवरक्षोभकृतां विवाहविघ्नकारिणामभावः किल। स्वयंवरविघातकाः शच्या विनाश्यन्त इत्यागमः। तेन काकुत्स्थमुद्दिश्य समत्सरः अपि क्षितिपाललोकः नृपजनः शशाम न अक्षुभ्यन् ॥

**तावत्प्रकीर्णाभिनवोपचार-**
**मिन्द्रायुधद्योतिततोरणाङ्कम्।**
**वरः स वध्वा सह राजमार्गं**
**प्रापद् ध्वजच्छायनिवारितोष्णम् ॥ ४ ॥**

**तावदिति** -- तावत्प्रकीर्णाः साकल्येन प्रसारिताः अभिनवा उपचाराः पुष्पादयो यत्र तथोक्तम्। इन्द्रायुधद्योतिततोरणाङ्कम् इन्द्रायुधानीव प्रकाशितानि तोरणानि अङ्काः यस्य तम्। ध्वजानां

छाया ध्वजच्छायम्। पूर्वपदार्थबाहुल्ये नपुंसकत्वम्। ध्वजच्छायेन निवारितः उष्णः यस्य तं राजमार्गं सः अजः वध्वा इन्दुमत्या सह प्रापत्। प्र + आप् लुङ्॥

ततस्तदालोकनतत्पराणां
सौधेषु चामीकरजालवत्सु।
बभूवुरित्थं पुरसुन्दरीणां
त्यक्तान्यकार्याणि विचेष्टितानि ॥५॥

तत इति — ततः चामीकरजालवत्सु सौवर्णगवाक्षयुक्तेषु सौधेषु तदालोकनतत्पराणामजं द्रष्टुमिच्छन्तीनां पुरसुन्दरीणामित्थं वक्ष्यमाणप्रकाराणि त्यक्तान्यकार्याणि विचेष्टितानि व्यापाराः बभूवुः॥

आलोकमार्गं सहसा व्रजन्त्या
कयाचिदुद्वेष्टनवान्तमाल्यः।
बन्धुं न सम्भावित एव तावत्
करेण रुद्धोऽपि च केशपाशः ॥ ६ ॥

आलोकेति— सहसा आलोकमार्गं दर्शनमार्गं व्रजन्त्या कयाचित् स्त्रिया उद्वेष्टनवान्तमाल्यः उन्मुक्तबन्धनविगलितमाल्यः करेण रुद्धोऽपि च केशपाशः केशकलापः तावद् आलोकमार्गपर्यन्तं बन्धुं न सम्भावित एव न चिन्तित एव॥

प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचिद् द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षा-
दलक्तकाङ्कां पदवीं ततान ॥ ७ ॥

प्रसाधिकेति — काचित् प्रसाधिकालम्बितमलङ्कर्त्र्या धृतं द्रवरागम् एव आर्द्रालक्तकमेव अग्रपादम् आक्षिप्य आकृष्य उत्सृष्टलीलागतिरागवाक्षाद् गवाक्षपर्यन्तं पदवीं मार्गमलक्तकाङ्कां लाक्षाचिह्नां ततान चकार । तनुधातोर्लिट् ॥

विलोचनं दक्षिणमञ्जनेन
सम्भाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसन्निकर्षं
ययौ शलाकामपरा वहन्ती ॥ ८ ॥

विलोचनमिति — अपरा स्त्री दक्षिणं विलोचनमञ्जनेन सम्भाव्यालङ्कृत्य तद्वञ्चितवामनेत्रा तथा एव शलाकामञ्जनतूलिकां वहन्ती वातायनसन्निकर्षं गवाक्षसमीपं ययौ । सव्यविलोचनस्याञ्जनं पूर्वं कार्यमिति नियममुल्लङ्घितवतीति द्योतयितुं दक्षिणग्रहणम् ॥

अर्धाचिता सत्वरमुत्थितायाः
पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद् रशना तदानी-
मङ्गुष्ठमूलार्पितसूत्रशेषा ॥ ९ ॥

अर्धेति — सत्वरम् इत्थितायाः कस्याश्चिद् अर्धमाचिता मणिगुम्भिता दुर्निमिते सम्भ्रमन्यस्ते पदे, पदे प्रतिपदं गलन्ती गलद्दला रशना मेखला तदा तांम् अङ्गुष्ठमूले, अर्पितं सूत्रमेव शेषः यस्याः सा आसीत् ॥

तासां मुखैरासवगन्धगर्भै-
र्व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः
सहस्रपत्राभरणा इवासन् ॥ १० ॥

तासामिति — सान्द्रकुतूहलानां सान्द्रदर्शनकौतूहलानां तासां स्त्रीणामासवगन्धो गर्भे येषां तैः, विलोलानि नेत्राणि एव भ्रमरा येषु तैर्मुखैर्व्याप्तान्तराः छन्नावकाशा गवाक्षाः सहस्रपत्राभरणा इव कमलालङ्कृता इव आसन् ॥

ता राघवं दृष्टिभिरापिबन्त्यो
नार्यो न जग्मुर्विषयान्तराणि ।
तथाहि शेषेन्द्रियवृत्तिरासां
सर्वात्मना चक्षुरिव प्रविष्टा ॥ ११ ॥

ता इति — ताः नार्यः राघवं रघुपुत्रमजं दृष्टिभिरापिबन्त्यः विषयान्तराणि अन्यान् विषयान् न जग्मुः । तथाहि— आसां नारीणां शेषेन्द्रियवृत्तिश्चक्षुर्भिन्नेन्द्रियव्यापारः सर्वात्मना चक्षुः प्रविष्टा इव । अन्यथा विषयान्तराग्रहणं कथमिति भावः ॥

स्थाने वृता भूपतिभिः परोक्षैः
स्वयंवरं साधुममंस्त भोज्या ।
पद्मेव नारायणमन्यथासौ
लभेत कान्तं कथमात्मतुल्यम् ॥ १२ ॥

**स्थान इति**— भोज्या इन्दुमती परोक्षैः चारदृष्टैः भूपतिभिः वृता प्रार्थिता अपि स्वयंवरं साधुममंस्त मेने । स्थाने एतद् युक्तम् । अन्यथा स्वयंवराभावे असौ इन्दुमती पद्मा श्रीः नारायणं विष्णुमिव आत्मतुल्यं पतिं कथं लभेत न लभेत एव ॥

परस्परेण स्पृहणीयशोभं
नचेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां विफलोऽभविष्यत् ॥ १३ ॥

**परस्परेणेति** — स्पृहणीयशोभमाशास्यसौन्दर्यमिदं द्वन्द्वं मिथुनं परस्परेण न अयोजयिष्यत् चेत् न योजयेद् यदि प्रजानां पत्युर्विधातुरस्मिन् द्वये रूपविधानयत्नः सौन्दर्यनिर्माणायासः विफलः अभविष्यत् । क्रियातिपत्तौ हेतुहेतुमद्भावे भूते लङ् । परस्परयोजनेन विधातुः प्रयत्नः विफलः नाभवदिति क्रियातिपत्तिरत्र सूचिता ॥

रतिस्मरौ नूनमिमावभूतां
राज्ञां सहस्रेषु तथाहि बाला ।
गतेयमात्मप्रतिरूपमेनं
मनो हि जन्मान्तरसङ्गतिज्ञम् ॥ १४ ॥

**रतीति—** रतिस्मरौ नूनमिमौ दम्पती अभूताम् उत्पन्नौ। तथाहि—इयं बाला राज्ञां सहस्रेषु मध्ये आत्मप्रतिरूपं स्वतुल्यमेनं गता प्राप्ता। मनः हि जन्मान्तरसङ्गतिज्ञम्। वासनाबलात् पूर्वजन्मसङ्गतिं मनः जानाति इति यावत्॥

**इत्युद्गताः पौरवधूमुखेभ्यः**
**शृण्वन् कथाः श्रोत्रसुखाः कुमारः।**
**उद्भासितं मङ्गलसंविधाभिः**
**सम्बन्धिनः सद्म समाससाद ॥ १५ ॥**

**इतीति—** इति उक्तप्रकारेण पौरवधूमुखेभ्य उद्गताः निस्सृताः श्रोत्रयोः सुखाः मधुराः कथाः शृण्वन् कुमारः अजः मङ्गलसंविधाभिः मङ्गलरचनाभिः उद्भासितं शोभितं सम्बन्धिनो भोजस्य सद्म गृहं समाससाद॥

**ततोऽवतीर्याशु करेणुकायाः**
**स कामरूपेश्वरदत्तहस्तः।**
**वैदर्भनिर्दिष्टमथो विवेश**
**नारीमनांसीव चतुष्कमन्तः ॥ १६ ॥**

**तत इति —** ततोऽनन्तरं करेणुकायाः हस्तिन्याः सकाशाद् आशु शीघ्रमवतीर्य कामरूपेश्वरे दत्तो हस्तो येन सोऽजः अथो अनन्तरं वैदर्भेण निर्दिष्टं प्रदर्शितमन्तः चतुष्कं चत्वरं नारीणां मनांसि इव विवेश॥

महार्हसिंहासनसंस्थितोऽसौ
सरत्नमर्घ्यं मधुपर्कमिश्रम्।
भोजोपनीतं च दुकूलयुग्मं
जग्राह सार्धं वनिताकटाक्षैः ॥ १७॥

महार्हेति—महार्हे सिंहासने संस्थितः असौ अजः भोजेन उपनीतं सरत्नः रत्नैः सहितं मधुपर्कमिश्रम् अर्घ्यं पूजाद्रव्यं दुकूलयोः क्षौमयोः युग्मं च वनिताकटाक्षैः अन्यस्त्रीणामपाङ्गदर्शनैः सार्धं जग्राह गृहीतवान् ॥

दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः।
वेलासकाशं स्फुटफेनराजि-
र्नवैरुदन्वानिव चन्द्रपादैः ॥ १८॥

दुकूलेति—दुकूलवासाः सोऽजः विनीतैर्नम्रैरवरोधरक्षैरन्तः-पुराधिकृतैः वधूसमीपं निन्ये । तत्र दृष्टान्तमाह—स्फुटफेनराजिरुद-न्वान् समुद्रः नवैः नूतनैः चन्द्रपादैः चन्द्रकिरणैः वेलायाः सकाशं समीपमिवेति ॥

तत्रार्चितो भोजपतेः पुरोधा
हुत्वाग्निमाज्यादिभिरग्निकल्पः।
तमेव चाधाय विवाहसाक्ष्ये
वधूवरौ सङ्गमयाञ्चकार ॥ १९॥

**तत्रेति**— तत्र सद्मनि अर्चितः पूजितः । ईषदसमाप्तः अग्निः अग्निकल्पः। अग्नितुल्य इत्यर्थः । भोजपतेः पुरोधाः पुरोहितः आज्यादिभिर्द्रव्यैः अग्निं हुत्वा तम् अग्निमेव विवाहसाक्ष्ये आधाय विवाहसाक्षिणं कृत्वा च । साक्षाद् द्रष्टा साक्षी तस्य भावः साक्ष्यम् । वधूवरौ सङ्गमयाञ्चकार योजयामास ॥

**हस्तेन हस्तं परिगृह्य वध्वाः**
**स राजसूनुः सुतरां बभासे।**
**अनन्तराशोकलताप्रवालं**
**प्राप्येव चूतः प्रतिपल्लवेन** ॥ २० ॥

**हस्तेनेति**— स राजसूनुः अजः हस्तेन वध्वाः इन्दुमत्याः हस्तं परिगृह्य गृहीत्वा अनन्तरायाः समीपगतायाः अशोकलतायाः प्रवालं पल्लवं प्रतिपल्लवेन प्रतिगतेन पल्लवेन स्वीयेन प्राप्य चूतः इव सुतरां बभासे अधिकं बभौ ॥

**आसीद् वरः कण्टकितप्रकोष्ठः**
**स्विन्नाङ्गुलिः संववृते कुमारी ।**
**वृत्तिस्तयोः पाणिसमागमेन**
**समं विभक्तेव मनोभवस्य** ॥ २१ ॥

**आसीदिति** — वरः अजः कण्टकितः रोमाञ्चितः प्रकोष्ठः यस्य सः आसीत् । कुमारी कन्या स्विन्नाङ्गुलिः स्वेदयुक्ताङ्गुलिः

संववृते बभूव । अत्रोत्प्रेक्षते — पाणिसमागमेन पाण्योः स्पर्शनेन कर्त्रा तयोः वधूवरयोः मनोभवस्य वृत्तिः स्थितिः समं विभक्ता इव । समीकृता इवेत्यर्थः ॥

**तयोरपाङ्गप्रविसारितानि**
**क्रियासमापत्तिनिवर्तितानि ।**
**ह्रीयन्त्रणामानशिरे मनोज्ञा-**
**मन्योन्यलोलानि विलोचनानि ॥ २२ ॥**

**तयोरिति**— अपाङ्गेषु प्रविसारितानि प्रान्तेषु प्रवर्तितानि क्रिययोः निरीक्षणलक्षणयोः समापत्त्या यदृच्छासङ्गत्या निवर्तितानि प्रत्याकृष्टानि अन्योन्यस्मिन् लोलानि सतृष्णानि तयोः दम्पत्योः विलोचनानि नेत्राणि मनोज्ञां रम्यां ह्रिया हेतुना यन्त्रणां सङ्कोचम् आनशिरे प्रापुः ॥

**प्रदक्षिणप्रक्रमणात् कृशानो-**
**रुदर्चिषस्तन्मिथुनं चकाशे ।**
**मेरोरुपान्तेष्विव वर्तमान-**
**मन्योन्यसंसक्तमहस्त्रियामम् ॥ २३ ॥**

**प्रदक्षिणेति** — तन्मिथुनमिन्दुमत्यजौ उदर्चिष उन्नतज्वालस्य कृशानोरनलस्य प्रदक्षिणप्रक्रमणात् प्रदक्षिणकरणात् मेरोरुपान्तुते

प्रान्तेषु वर्तमानमावर्तमानम्। मेरुं प्रदक्षिणीकुर्वदित्यर्थः। अन्योन्यसंसक्तमितरेतरसङ्गतम्। मिथुनस्यापि विशेषणमेतत्। अहश्च त्रियामा च अहस्त्रियामं रात्रिन्दिवमिव चकाशे आबभौ ॥

नितम्बगुर्वी गुरुणा प्रयुक्ता
वधूर्विधातृप्रतिमेन तेन।
चकार सा मत्तचकोरनेत्रा
लज्जावती लाजविसर्गमग्नौ ॥ २४ ॥

नितम्बेति—नितम्बेन गुर्वी अलघ्वी विधातृप्रतिमेन ब्रह्मतुल्येन गुरुणा याजकेन प्रयुक्ता नियुक्ता मत्तचकोरस्येव नेत्रे यस्याः सा लज्जावती सा वधूः अग्नौ लाजविसर्गं चकार। लाजहोमं कृतवतीत्यर्थः ॥

हविश्शमीपल्लवलाजगन्धी
पुण्यः कृशानोरुदियाय धूमः।
कपोलसंसर्पिशिखः स तस्या
मुहूर्तकर्णोत्पलतां प्रपेदे ॥ २५ ॥

हविरिति—हविषः आज्यादेः शमीपल्लवानां लाजानां च गन्धः अस्य इति सः तथोक्तः पुण्यो धूमः कृशानोः पावकाद् उदियाय उत्पन्नः। कपोले संसर्पिणी शिखा यस्य सः धूमः तस्याः वध्वाः मुहूर्तं कर्णोत्पलतां प्रपेदे प्राप ॥

**तदञ्जनक्लेदसमाकुलाक्षं**
**प्रम्लानबीजाङ्कुरकर्णपूरम् ।**
**वधूमुखं पाटलगण्डरेख-**
**माचारधूमग्रहणाद् बभूव ॥ २६ ॥**

**तदिति**— तद् वधूमुखमाचारेण प्राप्तात् धूमग्रहणाद् अञ्जनस्य क्लेदोऽञ्जनक्लेदः अञ्जनमिश्रो बाष्पद्रवः तेन समाकुले अक्षिणी यस्य तत् प्रम्लानो बीजाङ्कुरो यवाङ्कुरादिरेव कर्णपूरो यस्य तत पाटलगण्डरेखमरुणगण्डस्थलं च बभूव ॥

**तौ स्नातकैर्बन्धुमता च राज्ञा**
**पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम् ।**
**कन्याकुमारौ कनकासनस्था-**
**वार्द्राक्षतारोपणमन्वभूताम् ॥ २७ ॥**

**ताविति**— कनकासनस्थौ तौ कन्याकुमारौ स्नातकैर्गृहस्थ-विशेषैः बन्धुमता बन्धुपुरस्सरेण इति यावद् राज्ञा भोजेन पुरन्ध्रिभिः कुटुम्बिनीभिश्च क्रमशः प्रयुक्तं क्रमेण कृतं आर्द्राक्षतानामारोपणं शीर्षारोपणम् अन्वभूताम् अनुबभूवतुः ॥

**इति स्वसुर्भोजकुलप्रदीपः**
**सम्पाद्य पाणिग्रहणं स राजा ।**
**महीपतीनां पृथगर्हणार्थं**
**समादिदेशाधिकृतानधिश्रीः ॥ २८ ॥**

**इतीति**—अधिश्रीः अधिकसम्पद् भोजकुलप्रदीपः स राजा इति एवं स्वसुः इन्दुमत्याः पाणिग्रहणं विवाहं सम्पाद्य महीपतीनां राज्ञां पृथग् एकैकशः अर्हणार्थं पूजां कर्तुम् अधिकृतान् समादिदेश आज्ञापयामास ॥

**लिङ्गैर्मुदः संवृतविक्रियास्ते**
**ह्रदाः प्रसन्ना इव गूढनक्राः ।**
**वैदर्भमामन्त्र्य ययुस्तदीयां**
**प्रत्यर्प्य पूजामुपदाच्छलेन ॥ २९ ॥**

**लिङ्गैरिति**—मुदः लिङ्गैः आरोपितसन्तोषचिह्नैः संवृतविक्रियाः निगूहितमत्सराः प्रसन्नाः बहिर्निर्मलाः गूढनक्राः अन्तर्लीनग्राहाः ह्रदा इव स्थिताः ते राजानः वैदर्भं भोजम् आमन्त्र्य आपृच्छ्य तदीयां पूजां उपदाच्छलेन उपायनव्याजेन प्रत्यर्प्य समर्प्य ययुः जग्मुः ॥

**स राजलोकः कृतपूर्वसंवि-**
**दारम्भसिद्धौ समयोपलभ्यम् ।**
**आदास्यमानः प्रमदामिषं त-**
**दावृत्य पन्थानमजस्य तस्थौ ॥ ३० ॥**

**स इति**—आरम्भसिद्धौ कार्यसिद्धौ विषये कृतपूर्वा पूर्वं कृता संविद् सङ्केतो मार्गावरोधरूपः येन सः स राजलोकः समयोपलभ्यम्

अजप्रस्थानकाले लभ्यं तत् प्रमदैव आमिषं भोग्यवस्तु आदास्यमानः ग्रहीष्यन् अजस्य पन्थानं मार्गम् आवृत्य अवरुध्य तस्थौ ॥

भर्तापि तावत् क्रथकौशिकाना-
मनुष्ठितानन्तरजाविवाहः ।
सत्त्वानुरूपं हरणीकृतश्रीः
प्रास्थापयद् राघवमन्वगाच्च ॥ ३१ ॥

भर्तापीति—अनुष्ठितः अनन्तरजायाः कनीयस्याः विवाहो येन सः क्रथकौशिकानां भर्त्ता अपि विदर्भनाथोऽपि तावत्तदा सत्त्वानुरूपम् उत्साहानुरूपं यथा तथा, हरणं कन्यायै देयं धनं, हरणीकृतश्रीः सन् राघवमजं प्रास्थापयत् प्रस्थापितवान् अन्वगात् च अनुजगाम च ॥

तिस्रस्त्रिलोकप्रथितेन सार्ध-
मजेन मार्गे वसतीरुषित्वा ।
तस्मादपावर्तत कुण्डिनेशः
पर्वात्यये सोम इवोष्णरश्मेः ॥ ३२ ॥

तिस्र इति—कुण्डिनस्य ईशः भोजः त्रिषु लोकेषु प्रथितेन प्रसिद्धेन। प्रथितशब्दे उत्तरपदे त्रिलोकपदयोरुत्तरपदद्विगुः । अजेन सार्धं मार्गे तिस्रः वसती रात्रीः उषित्वा पर्वात्यये दर्शान्ते उष्णरश्मेः सूर्यात् सोमः चन्द्रः इव तस्माद् अजाद् अपावर्तत। तं विसृज्य न्यवर्तत इत्यर्थः ॥

प्रमन्यवः प्रागपि कोसलेन्द्रे
प्रत्येकमात्तस्वतया बभूवुः ।
ततो नृपाश्चक्षमिरे समेताः
स्त्रीरत्नलाभं न तदात्मजस्य ॥ ३३ ॥

प्रमन्यव इति—नृपाः प्रागपि प्रत्येकम् आत्तस्वतया दिग्विजये हृतधनत्वेन कोसलेन्द्रे रघौ प्रमन्यवः रूढवैराः बभूवुः इति यत् ततः समेताः संहताः सन्तः तदात्मजस्य रघुपुत्रस्य अजस्य स्त्रीरत्नलाभं न चक्षमिरे न सेहिरे ॥

तमुद्वहन्तं पथि भोजकन्यां
रुरोध राजन्यगणः स दृप्तः ।
बलिप्रदिष्टां श्रियमाददानं
त्रैविक्रमं पादमिवेन्द्रशत्रुः ॥ ३४ ॥

तमिति—दृप्तः गर्वितः सः राजन्यगणः राजसमूहः पथि मार्गे भोजकन्यामिन्दुमतीमुद्वहन्तं नयन्तं तमजं बलिप्रदिष्टां वैरोचनेन दत्तां श्रियम् आददानं स्वीकुर्वाणं त्रैविक्रमं त्रिविक्रमसम्बन्धिनं पादम् इन्द्रशत्रुः प्रह्लादनामा असुर इव रुरोध ॥

तस्याः स रक्षार्थमनल्पयोध-
मादिश्य पित्र्यं सचिवं कुमारः ।
प्रत्यग्रहीत् पार्थिववाहिनीं तां
भागीरथीं शोण इवोत्तरङ्गः ॥ ३५ ॥

**तस्या इति**—सः कुमारः अजः तस्याः इन्दुमत्याः रक्षार्थम् अनल्पयोधं बहुभटं पितुरागतं पित्र्यं विश्वास्यमित्यर्थः। सचिवमादिश्य आज्ञाप्य तां पार्थिववाहिनीं राजसेनां भागीरथीं गङ्गाम् उत्तरङ्गः उन्नततरङ्गः शोणः शोणाभिधो नद इव प्रत्यग्रहीद् अभियुक्तवान् ॥

**पत्तिः पदातिं रथिनं रथेशः**
**तुरङ्गसादी तुरगाधिरूढम् ।**
**यन्ता गजस्याऽभ्यपतद् गजस्थं**
**तुल्यप्रतिद्वन्द्वि बभूव युद्धम्** ॥ ३६ ॥

**पत्तिरिति**—पत्तिः पादचारो योद्धा पदातिं पादचारम् अभ्यपतत्। रथेशः रथिनम् अभ्यपतत्। तुरङ्गसादी तुरङ्गाधिरूढम् अभ्यपतत्। गजस्य यन्ता गजारोहः गजस्थम् अभ्यपतत्। इत्थं तुल्यप्रतिद्वन्द्वि एकजातीयप्रतिभटं युद्धं बभूव ॥

**नदत्सु तूर्येष्वविभाव्यवाचो**
**नोदीरयन्ति स्म कुलापदेशान् ।**
**बाणाक्षरैरेव परस्परस्य**
**नामोर्जितं चापभृतः शशंसुः** ॥ ३७ ॥

**नदत्स्विति**—तूर्येषु नदत्सु सत्सु अविभाव्यवाचः अनवधार्यगिरः चापभृतः धन्विनः कुलम् अपदिश्यते प्रख्यायते यैः तान्

कुलापदेशान् कुलनामानि न उदीरयन्ति स्म । किन्तु बाणाक्षरैः बाणलिखितवर्णैरेव परस्परस्य अन्योन्यस्य ऊर्जितं तेजस्वि नाम शशंसुः ऊचुः ॥

**उत्थापितः संयति रेणुरश्वैः**
**सान्द्रीकृतः स्यन्दनवंशचक्रैः ।**
**विस्तारितः कुञ्जरकर्णतालै-**
**र्नेत्रक्रमेणोपरुरोध सूर्यम्** ॥ ३८ ॥

**उत्थापित इति** — संयति युद्धे अश्वैः उत्थापितः स्यन्दनवंशानां रथगणानां चक्रैः रथाङ्गैः सान्द्रीकृतः कुञ्जरकर्णानां तालैः ताडनैः विस्तारितः च रेणुः धूलिः नेत्रक्रमेण अंशुकपरिपाट्या । अंशुकेन इवेत्यर्थः । सूर्यम् उपरुरोध आच्छादयामास ॥

**मत्स्यध्वजा वायुवशाद् विकीर्णै-**
**र्मुखैः प्रवृद्धध्वजिनीरजांसि ।**
**बभुः पिबन्तः परमार्थमत्स्याः**
**पर्याविलानीव नवोदकानि** ॥ ३९ ॥

**मत्स्येति** — वायुवशाद् विकीर्णैः विवृतैः मुखैः प्रवृद्धानि ध्वजिनीरजांसि सैन्यरेणून् पिबन्तः गृह्णन्तः मत्स्यध्वजा मत्स्याकाराः ध्वजाः पर्याविलानि परितः कलुषाणि नवोदकानि पिबन्तः परमार्थमत्स्याः अकृत्रिममत्स्याः इव बभुः भान्ति स्म । भातेर्लिट् ॥

रथो रथाङ्गध्वनिना विजज्ञे
विलोलघण्टाक्वणितेन नागः ।
स्वभर्तृनामग्रहणाद् बभूव
सान्द्रे रजस्यात्मपरावबोधः ॥ ४० ॥

रथविति— सान्द्रे रजसि रथः रथाङ्गध्वनिना चक्रस्वनेन विजज्ञे ज्ञातः । नागः गजः विलोलघण्टानां क्वणितेन नादेन जज्ञे । आत्मपरावबोधः स्वपरविवेकः योधानामिति शेषः । स्वभर्तृणां स्वस्वामिनां नामग्रहणात् नामोच्चारणाद् बभूव । सर्वे शब्दं ज्ञात्वा प्राहरन्नित्यर्थः ॥

आवृण्वतो लोचनमार्गमाजौ
रजोन्धकारस्य विजृम्भितस्य ।
शस्त्रक्षताश्वद्विपवीरजन्मा
बालारुणोऽभूद् रुधिरप्रवाहः ॥ ४१ ॥

आवृण्वतविति — लोचनमार्गम् आवृण्वतः दृष्टिपथमुपरुन्धत आजौ रणे विजृम्भितस्य रजः एव अन्धकारः तस्य शस्त्रेणः क्षताद् अश्वाश्च द्विपाश्च वीराश्च अश्वद्विपवीरं तस्माद् जन्म यस्य सः रुधिरप्रवाहः रक्तप्रवाहः बालारुणः बाल्यसूर्यः अभूत् ॥

स छिन्नमूलः क्षतजेन रेणु-
स्तस्योपरिष्टात् पवनावधूतः ।
अङ्गारशेषस्य हुताशनस्य
पूर्वोत्थितो धूम इवावभासे ॥ ४२ ॥

**स इति**—क्षतजेन रुधिरेण छिन्नमूलः त्याजितभूतलसम्बन्धः तस्य रक्तस्य उपरिष्टाद् ऊर्ध्वभागे पवनावधूतः वाताहतः स रेणुः धूलिः अङ्गारशेषस्य हुताशनस्य अग्नेः पूर्वम् उत्थितो धूमः इव आबभासे बभौ ॥

**प्रहारमूर्छापगमे रथस्था**
**यन्तॄनुपालभ्य निवर्तिताश्वान् ।**
**यैः सादिता लक्षितपूर्वकेतून्**
**तानेव सामर्षतया निजघ्नुः ॥ ४३ ॥**

**प्रहारेति**—प्रहारजातमूर्छायाः अपगमे सति रथस्थाः रथे एव संरक्षिता इत्यर्थः। मूर्छितरक्षणार्थं निवर्तिताश्वान् यन्तॄन् सारथीन् उपालभ्य अधिक्षिप्य पूर्वं यैः सादिताः स्वयं प्रहृताः लक्षितपूर्वकेतून् पूर्वं दृष्टैः केतुभिः प्रत्यभिज्ञातान् तान् एव सामर्षतया सरोषतया निजघ्नुः प्रजह्नुः ॥

**अप्यर्धमार्गे परबाणलूना**
**धनुर्भृतां हस्तवतां पृषत्काः ।**
**सम्प्रापुरेवात्मजवानुवृत्त्या**
**पूर्वार्धभागैः फलिभिः शरव्यम् ॥ ४४ ॥**

**अपीति** — अर्धश्चासौ मार्गश्च तस्मिन्नर्धमार्गे परेषां बाणैः लूनाः छिन्ना अपि हस्तवतां कुशलहस्तवताम्। प्रशंसायां मतुप्। धनुर्भृतां पृषत्काः शराः आत्मजवानुवृत्त्या स्वकीयवेगानुबन्धेन फलिभिः

बाणाग्रवद्भिः अर्धाश्च ते भागाश्च तैः पूर्वैरर्धभागैः शरवे हिंसाय हितं शरव्यं लक्ष्यं सम्प्रापुरेव। न तु मध्ये निपेतुरित्यर्थः ॥

**आधोरणानां गजसन्निपाते**
**शिरांसि चक्रैर्निशितैः क्षुरप्रैः।**
**हृतान्यपि श्येननखाग्रकोटि-**
**व्यासक्तकेशानि चिरेण पेतुः ॥ ४५ ॥**

**आधोरणानामिति** — गजसन्निपाते गजयुद्धे निशितैः तीक्ष्णैः क्षुरप्रैः बाणविशेषैः चक्रैः आयुधविशेषैः हृतान्यपि छिन्नान्यपि श्येनानां पक्षिविशेषाणां नखाग्रकोटिषु व्यासक्ताः केशा येषां तानि अधोरणानां हस्त्यारोहाणां शिरांसि चिरेण पेतुः। शिरःपातात् प्रागेव आरुह्य पश्चाद् उत्पततां पक्षिणां नखेषु केशासङ्गश्चिरपातहेतुरित्यर्थः ॥

**पूर्वं प्रहर्ता न जघान भूयः**
**प्रतिप्रहाराक्षममश्वसादी।**
**तुरङ्गमस्कन्धनिषण्णदेहं**
**प्रत्याश्वसन्तं रिपुमाचकाङ्क्षे ॥ ४६ ॥**

**पूर्वमिति**—पूर्वं प्रहर्ता अश्वसादी तौरङ्गिकः प्रतिप्रहारे अक्षमम् अशक्तं तुरङ्गमस्कन्धे अश्वस्कन्धे निषण्णदेहं मूर्छितमिति भावः। रिपुं भूयो न जघान पुनर्न प्रजहार। किन्तु प्रत्या-

श्वसन्तं पुनरुज्जीवन्तमाचकाङ्क्षे। अतिक्षीणस्य प्रहारे अधर्मत्वादिति भावः ॥

तनुत्यजां वर्मभृतां विकोशै-
र्बृहत्सु दन्तेष्वसिभिः पतद्भिः।
उद्यन्तमग्निं शमयाम्बभूवु-
र्गजा विविग्नाः करशीकरेण ॥ ४७ ॥

**तनुत्यजामिति**—तनुत्यजां तनुषु निस्पृहाणां वर्मभृतां कवचिनां सम्बन्धिभिः बृहत्सु महत्सु दन्तेषु पतद्भिर्विकोशैः कोशरहितैः कोशादुद्धृतैरित्यर्थः। असिभिरुद्यन्तमुद्गच्छन्तमग्निं विविग्ना भीताः गजाः करशीकरेण शमयाम्बभूवुः शमं प्रापयामासुः ॥

शिलीमुखोत्कृत्तशिरःफलाढ्या
च्युतैः शिरस्त्रैश्चषकोत्तरेव।
रणक्षितिः शोणितमद्यकुल्या
रराज मृत्योरिव पानभूमिः ॥ ४८ ॥

**शिलीमुखेति**—शिलीमुखैः बाणैः उत्कृतैः छिन्नैः शिरोभिः एव फलैः आढ्या सम्पन्ना च्युतैः भ्रष्टैः शिरस्त्रैः शीर्षण्यैः चषकोत्तरा इव पानपात्रप्रचुरा इव स्थिता शोणितस्य एव मद्यस्य कुल्याः प्रवाहाः यस्यां सा रणक्षितिः युद्धभूमिः मृत्योः यमस्य पानभूमिः इव रराज। राजृधातोर्लिट् ॥

उपान्तयोर्निष्कुषितं विहङ्गै-
राक्षिप्य तेभ्यः पिशितप्रियापि ।
केयूरकोटिक्षततालुदेशा
शिवा भुजच्छेदमपाचकार ॥ ४९ ॥

**उपान्तयोरिति**—उपान्तयोः प्रान्तयोः विहङ्गैः खगैः निष्कुषितं तुण्डखण्डितं भुजच्छेदं करखण्डं तेभ्यः विहगेभ्यः आक्षिप्य आच्छिद्य पिशितप्रिया मांसलोलुपा अपि शिवा क्रोष्ट्री केयूरस्य कोट्या क्षतस्तालुदेशो यस्याः सा सती अपाचकार अपसारयामास ॥

कश्चिद् द्विषत्खड्गहृतोत्तमाङ्गः
सद्यो विमानप्रभुतामुपेत्य ।
वामाङ्कसंसक्तसुराङ्गनः स्वं
नृत्यत्कबन्धं समरे ददर्श ॥ ५० ॥

**कश्चिदिति** — द्विषतः शत्रोः खड्गेन हृतोत्तमाङ्गः कृत्तशिराः कश्चिद् वीरः सद्यः सहसा विमानप्रभुतां विमानाधिपत्यम् उपेत्य प्राप्य वामाङ्कसंसक्ता सव्योत्सङ्गनिषङ्गिणी सुराङ्गना देवनारी यस्य तादृशः सन् नृत्यत् स्वं निजं कबन्धम् अशिरस्ककलेबरं समरे समरस्थले ददर्श अद्राक्षीत् ॥

अन्योन्यसूतोन्मथनादभूतां
तावेव सूतौ रथिनौ च कौचित् ।
व्यश्वौ गदाव्यायतसम्प्रहारौ
भग्नायुधौ बाहुविमर्दनिष्ठौ ॥ ५१ ॥

**अन्योन्येति**—कौचिद् वीरौ अन्योन्यस्य सूतयोः सारथ्योः उन्मथनाद् हननाद् हेतोः तौ एव सूतौ रथिनौ योद्धारौ च अभूताम्। व्यश्वौ नष्टाश्वौ सन्तौ गदाभ्यां व्यायतो दीर्घः सम्प्रहारो युद्धं ययोस्तौ अभूताम्। ततः भग्नायुधौ भग्नगदौ सन्तौ बाहुविमर्दनिष्ठौ बाहुयुद्धासक्तौ अभूताम् ॥

**परस्परेण क्षतयोः प्रहर्त्रो-**
**रुत्क्रान्तवाय्वोः समकालमेव ।**
**अमर्त्यभावेऽपि कयोश्चिदासी-**
**देकाप्सरःप्रार्थितयोर्विवादः ॥ ५२ ॥**

**परस्परेणेति**—परस्परेण क्षतयोः प्रहृतयोः समकालम् एककालं यथा तथा उत्क्रान्तवाय्वोः युगपद् एव उत्क्रान्तप्राणयोरेकस्यामप्सरसि प्रार्थितं प्रार्थना ययोः तयोः। "स्त्रियां बहुष्वप्सरसः"। इति प्रायिकमित्यभिप्रायः। कयोश्चित् प्रहर्त्रोर्योधयोः अमर्त्यभावेऽपि देवत्वेऽपि विवादः कलहः आसीत् ॥

**व्यूहावुभौ तावितरेतरस्माद्**
**भङ्गं जयं चापतुरव्यवस्थम् ।**
**पश्चात् पुरो मारुतयोः प्रवृद्धौ**
**पर्यायवृत्त्येवमहार्णवोर्मी ॥ ५३ ॥**

**व्यूहाविति**—तावुभौ व्यूहौ सेनासङ्घातौ पश्चात् पुरश्च यौ मारुतौ तयोः पर्यायवृत्त्या क्रमप्रवृत्त्या प्रवृद्धौ महान्तौ महार्णवोर्मी

समुद्रतरङ्गौ इव इतरेतरस्मादन्योन्यस्माद्व्यवस्थमनियतं भङ्गं पराजयं जयं च आपतुः प्राप्तवन्तौ । आप्लृधातोर्लिट् ॥

परेण भग्नेऽपि बले महौजा
ययावजः प्रत्यरिसैन्यमेव ।
धूमो निवर्त्येत समीरणेन
यतो हि कक्षस्तत एव वह्निः ॥ ५४ ॥

परेणेति--बले स्वसैन्ये परेण परबलेन भग्ने सत्यपि महौजा महाबलः अजः अरिसैन्यं प्रत्येव ययौ । तथाहि—समीरणेन वातेन धूमः निवर्त्येत कक्षादपसार्येत। वह्निः तु यतः यत्र कक्षः तृणं ततः एव तत्र एव प्रवर्तते ॥

रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ।
विलोडयामास महावराहः
कल्पक्षयोद्वृत्तमिवार्णवाम्भः ॥ ५५ ॥

रथीति—रथी आरूढरथः निषङ्गी तूणीरवान् कवची धनुष्मान् दृप्तः रणदृप्तः एकवीरः असहायवीरः सः अजः राजन्यकं राजसमूहं महावराहः आदिवराहः कल्पक्षये कल्पान्ते उद्वृत्तम् उद्वेलम् अर्णवाम्भः समुद्रजलम् इव विलोडयामास ॥

स दक्षिणं तूणमुखेन वामं
व्यापारयन् हस्तमलक्ष्यताजौ ।
आकर्णकृष्टा सकृदस्य योद्धु-
र्मौर्वीव बाणान् सुषुवे रिपुघ्नान् ॥ ५६ ॥

स इति—सः अजः आजौ रणे दक्षिणं हस्तं तूणमुखेन निषङ्गद्वारेण वामम् अतिसुन्दरं व्यापारयन् सङ्गमयन् अलक्ष्यत । शरसन्धानादयो लक्षयितुमसाध्या इत्याह--सकृद् आकर्णकृष्टा योद्धुः युद्धं कुर्वाणस्य अस्य अजस्य मौर्वी ज्या रिपुघ्नान् अरिनाशकान् बाणान् सुषुवे इवेति ॥

स रोषदष्टाधिकलोहितोष्ठै-
र्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः ।
तस्तार गां भल्लनिकृत्तकण्ठै-
र्हुङ्कारगर्भैर्द्विषतां शिरोभिः ॥ ५७ ॥

स इति—सः अजः रोषेण दष्टाः अत एव अधिकलोहिता ओष्ठा येषां तैः व्यक्ताः ऊर्ध्वरेखाः यासां ताः भ्रुकुटीः भ्रूभङ्गान् वहद्भिः भल्लैः अस्त्रविशेषैः निकृत्ताः छिन्नाः कण्ठाः येषां तैः हुङ्कारगर्भैः हुङ्कारसहितैः द्विषताम् अरीणां शिरोभिः गां भूमिं तस्तार आच्छा-दयामास ॥

सर्वैर्बलाङ्गैर्द्विरदप्रधानैः
सर्वायुधैः कङ्कटभेदिभिश्च ।
सर्वप्रयत्नेन च भूमिपाला-
स्तस्मिन् प्रजह्रुर्युधि सर्व एव ॥ ५८ ॥

सर्वैरिति— द्विरदप्रधानैः गजमुख्यैः सर्वैः बलाङ्गैः गजतुरगरथपत्तिभिः कङ्कटभेदिभिः कवचभेदिभिः सर्वायुधैः च सर्वप्रयत्नैः च सर्वे एव भूमिपालाः युधि रणे तस्मिन् अजे प्रजह्रुः प्रहारं चक्रुरित्यर्थः । हृधातोर्लिट् ॥

सोऽस्त्रव्रजच्छन्नरथः परेषां
ध्वजाग्रमात्रेण बभूव लक्ष्यः ।
नीहारमग्नो दिनपूर्वभागः
किञ्चित्प्रकाशेन विवस्वतेव ॥ ५९ ॥

सवितिः— परेषां द्विषाम् अस्त्रव्रजैः शरसमूहैः छन्नरथः सः अजः नीहारे हिमे मग्नः दिनस्य पूर्वभागः प्रातःकालः किञ्चित्प्रकाशेन ईषल्लक्ष्येण विवस्वता सूर्येण इव ध्वजाग्रमात्रेण ध्वजस्य अग्रभागेन एव लक्ष्यः लक्षयितुं शक्यः बभूव ॥

प्रियंवदात् प्राप्तमसौ कुमारः
प्रायुङ्क्त राजस्वधिराजसूनुः ।
गान्धर्वमस्त्रं कुसुमास्त्रकान्तः
प्रस्वापनं स्वप्ननिवृत्तलौल्यः ॥ ६० ॥

**प्रियंवदादिति** —— अधिराजसूनुः महाराजपुत्रः कुसुमास्त्र-कान्तः मदनसुन्दरः स्वप्नात् निवृत्तलौल्यः वितृष्णः । जागरूक इति यावत । असौ कुमारः प्रियंवदात् तन्नामकाद् गन्धर्वात् प्राप्तं गान्धर्वं गन्धर्वदेवताकं प्रस्वापनं निद्राजनकम् अस्त्रं राजसु प्रायुङ्क्त प्रयुक्तवान् । युजिर्धातोर्लङ् ॥

**ततो धनुष्कर्षणमूढहस्त-**
**मेकांसपर्यस्तशिरस्त्रजालम् ।**
**तस्थौ ध्वजस्तम्भनिषण्णदेहं**
**निद्राविधेयं नरदेवसैन्यम्** ॥ ६१ ॥

**ततविति** —— ततः धनुषः चापस्य कर्षणे मूढहस्तम् अव्यापृतकरम् एकस्मिन्नंसे भुजशिरसि पर्यस्तं स्रस्तं शिरस्त्राणां जालं सन्दोहः यस्य तत् । ध्वजस्तम्भेषु निषण्णाः देहाः यस्य तत् । नरदेवानां नृपाणां सेना एव सैन्यं निद्राविधेयं निद्राधीनं सत् तस्थौ । ष्ठाधातोर्लिट् ॥

**ततः प्रियोपात्तरसेऽधरोष्ठे**
**निवेश्य दध्मौ जलजं कुमारः ।**
**तेन स्वहस्तार्जितमेकवीरः**
**पिबन् यशो मूर्तमिवावभासे** ॥ ६२ ॥

**तत इति**—ततः कुमारः अजः प्रियया इन्दुमत्या उपात्तरसे आस्वादितमाधुर्ये । अतिश्लाघ्ये इति भावः । अधरोष्ठे जलजं

शङ्खं निवेश्य निधाय दध्मौ मुखमारुतेन पूरयामास । तेन ओष्ठस्थितेन शङ्खेन एकवीरः अजः स्वहस्तार्जितं मूर्त्तं मूर्त्तिमद् यशः पिबन् इव आबभासे । यशसो धावल्यादित्यर्थः ॥

शङ्खस्वनाभिज्ञतया निवृत्ता-
स्तं सन्नशत्रुं ददृशुः स्वयोधाः ।
निमीलितानामिव पङ्कजानां
मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥ ६३ ॥

शङ्खेति—शङ्खस्य अजविजयनिमित्तकस्य स्वनस्य निनदस्य अभिज्ञतया प्रत्यभिज्ञाततया निवृत्ताः प्रधाव्य प्रत्यागताः योधाः सन्नशत्रुं निद्राणरिपुं तमजं निमीलितानां पङ्कजानां मध्ये स्फुरन्तं प्रतिमा चासौ शशाङ्कश्च तं प्रतिमाशशाङ्कं प्रतिबिम्बितविधुमिव ददृशुः अद्राक्षुः । दृशिर्धातोर्लिट् ॥

सशोणितैस्तेन शिलीमुखाग्रै-
र्निक्षेपिताः केतुषु पार्थिवानाम् ।
यशो हृतं सम्प्रति राघवेण
न जीवितं वः कृपयेति वर्णाः ॥ ६४ ॥

सशोणितैरिति — सम्प्रति राघवेण रघुसूनुना पूर्वं रघुणा इव, "हे नृपाः! वः युष्माकं यशः हृतम्। जीवितं तु कृपया न हृतम्। अशक्त्या तु न" इति ईदृशाः वर्णाः। एतदर्थकं वाक्यमित्यर्थः ।

सशोणितैः रक्तसिक्तैः शिलीमुखाग्रैः शराग्रैः साधनैः तेन अजेन प्रयोजकेन पार्थिवानां केतुषु ध्वजेषु निक्षेपिताः प्रयोज्यैः सैनिकैः लेखिता इत्यर्थः ॥

**स चापकोटीनिहितैकबाहुः**
**शिरस्त्रनिष्कर्षणभिन्नमौलिः ।**
**ललाटबद्धश्रमवारिबिन्दु-**
**र्भीतां प्रियामेत्य वचो बभाषे ॥ ६५ ॥**

**स इति** — सः अजः भीतां प्रियामिन्दुमतीम् एत्य प्राप्य, चापस्य कोट्यां निहितः एकः बाहुः येन सः, शिरस्त्रं शीर्षण्यं तस्य निष्कर्षणेन अपनयनेन भिन्ना विश्लथा मौलिः केशबन्धः यस्य सः, ललाटे बद्धाः श्रमवारीणां बिन्दवो यस्य सः युद्धायासजातस्वेदबिन्दुः सन् बभाषे ॥

**इतः परानर्भकहार्यशस्त्रान्**
**वैदर्भि ! पश्यानुमता मयासि ।**
**एवंविधेनाहवचेष्टितेन**
**त्वं प्रार्थ्यसे हस्तगता ममैभिः ॥ ६६ ॥**

**इत इति** — हे वैदर्भि ! हे इन्दुमति ! इतः इदानीम् अर्भकैर्बालैर्हार्याणि शस्त्राणि येषां तान् परान् अरीन् पश्य । मया अनुमता असि । द्रष्टुमिति शेषः । एभिः भूपैः एवंविधेन निद्रारूपेण आहवचेष्टितेन रणकर्मणा मम हस्तगता करगतावद्दुर्ग्रहा त्वं प्रार्थ्यसे अपजिहीर्ष्यसे ॥

तस्याः प्रतिद्वन्द्विभवाद् विषादात्
सद्यो विमुक्तं मुखमाबभासे ।
निःश्वासबाष्पापगमात् प्रपन्नः
प्रसादमात्मीयमिवात्मदर्शः ॥ ६७ ॥

**तस्या इति** — प्रतिद्वन्द्विभवात् रिपोर्जाताद् दैन्यात् सद्य । विमुक्तं तस्याः इन्दुमत्याः मुखं निःश्वासस्य बाष्पस्य ऊष्मणः अपगमाद् अपनयनाद् हेतोः आत्मीयं स्वीयं प्रसादं नैर्मल्यं प्रपन्नः प्राप्तः, आत्मा स्वरूपं दृश्यते अस्मिन् इति आत्मदर्शः आदर्शः इव आबभासे ॥

हृष्टापि सा ह्रीविजिता न साक्षाद्
वाग्भिः सखीनां प्रियमभ्यनन्दत् ।
स्थली नवाम्भःपृषताभिवृष्टा
मयूरकेकाभिरिवाभ्रवृन्दम् ॥ ६८ ॥

**हृष्टेति**—सा इन्दुमती हृष्टा पत्युः पौरुषेण मुदितापि ह्रिया लज्जया विजिता यतोऽतः प्रियं पतिं साक्षात् स्वयं न अभ्यनन्दत् प्रशशंस । किन्तु नवैरम्भसः पृषतैर्जलस्य बिन्दुभिरभिवृष्टा सिक्ता स्थली अकृत्रिमभूमिरभ्रवृन्दं मेघसमूहं मयूरस्य केकाभिरिव सखीनां वाग्भिः अभ्यनन्दत् ॥

इति शिरसि स वामं पादमाधाय राज्ञा-
मुदवहदनवद्यां तामवद्यादपेतः ।
रथतुरगरजोभिस्तस्य रूक्षालकाग्रा
समरविजयलक्ष्मीः सैव मूर्ता बभूव ॥ ६९ ॥

**इतीति**—नोद्यते नोच्यत इत्यवद्यं गर्ह्यं तस्माद् अपेतः दोषरहितः सः अजः राज्ञां शिरसि वामं पादमाधाय विधाय अनवद्यां दोषरहितां ताम् इन्दुमतीम् उदवहद् आत्मसाच्चकार। तस्य अजस्य रथतुरगस्य रजोभी रूक्षाणि परुषाणि अलकाग्राणि चूर्णकुन्तलाग्राणि यस्याः सा, सा एव इन्दुमती एव मूर्ता मूर्तिमती समरविजयलक्ष्मीः बभूव। एतल्लाभादितरस्याः निष्प्रयोजनत्वमित्यर्थः ॥

प्रथमपरिगतार्थस्तं रघुः सन्निवृत्तं
विजयिनमभिनन्द्य श्लाघ्यजायासमेतम् ।
तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभू-
न्नहि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥ ७० ॥

**प्रथमेति**—प्रथमं अजागमनात् पूर्वमेव परिगतः अवगतः अर्थः विवाहविजयरूपो येन सः रघुः विजयिनं श्लाघ्यजायासमेतं सन्निवृत्तं स्वपुरं प्रत्यायातं तमजमभिनन्द्य तदुपहितकुटुम्बः तस्मिन् अजे उपहितकुटुम्बः न्यस्तभारः सन् शान्तिमार्गे उत्सुकः अभूत् ।

तथाहि—कुलधुर्ये कुलधुरन्धरे सति सूर्यवंश्याः सूर्यवंशे भवाः राजानः गृहाय गृहस्थाश्रमाय न भवन्ति। सूर्यवंशे जाता राजानः पुत्रं राज्ये अभिषिच्य तपः चिकीर्षवः वनं जिगमिषन्ति इत्यभिप्रायः ॥

---

## परिशीलनम्।

१. विगृह्णीत —

(१) ध्वजच्छायनिवारितोष्णम्
(२) अर्धाचिता
(३) विषयान्तराणि
(४) विवाहसाक्ष्ये
(५) रतिस्मरौ
(६) मनोभवस्य
(७) अहस्त्रियामम्
(८) समाकुलाक्षम्
(९) उपदाच्छलेन
(१०) त्रिलोकप्रथितेन
(११) प्रत्येकम्
(१२) नृपाः
(१३) रक्षार्थम्
(१४) शिरस्त्रैः
(१५) रिपुघ्नान्

२. प्रत्ययार्थान् वदत —

(१) भोज्या
(२) अग्निकल्पः
(३) वैदर्भम्
(४) तदीयाम्
(५) पित्र्यम्
(६) शरव्यम्
(७) रथी
(८) राजन्यकम्
(९) कुलधुर्ये
(१०) सूर्यवंश्याः

३. अर्थं लिखत—

(१) प्रसाधिका
(२) आगवाक्षात्
(३) चतुष्कम्
(४) अर्घ्यम्
(५) फेनराजिः
(६) प्रकोष्ठः
(७) चकोरः
(८) लाजाः
(९) उपदा
(१०) संवित्
(११) हरणम्
(१२) आजौ
(१३) चषकः
(१४) कुल्या
(१५) निष्कुषितम्
(१६) तालु
(१७) शिवा
(१८) कङ्कटः

४. क्रियारूपाणि पठत—

(१) जग्मुः
(२) लभेत
(३) निन्ये
(४) उदियाय
(५) अन्वगात्
(६) प्रत्यग्रहीत्
(७) निजघ्नुः
(८) रराज

५. "बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि" —
विचेष्टितानि कीदृशानि ?

६. इन्दुमतीविवाहक्रियां वर्णयत।

७. अजस्य रिपूणां च मिथो युद्धं वर्णयत।

८. प्रकृते योजयत —

(१) "मनो हि जन्मान्तरसङ्गतिज्ञम्" ।

(२) "यतो हि कक्षस्तत एव वह्निः" ॥

९. वाक्येषु योजयत —

(१) अन्यथा
(२) कथम्
(३) प्राप्य
(४) अभविष्यत्
(५) अन्योन्यम्
(६) चिरेण
(७) सकृत्
(८) किञ्चित्

१०. उदाहरणानि प्रदर्श्य "उपमा कालिदासस्य" इति बचनमव्यभिचरितमिति समर्थयत ॥

---

## प्रथमः पाठः

## श्रीकालिदासः ।

सकललोकप्रशस्तेषु महाकविषु प्रथमगणनीयो भवति महाकविः कालिदासः । न केवलं भारतम्, किन्तु द्वीपान्तराण्यपि तदीयेन यशसा धवलीकृतानि विद्यन्ते ॥

"कालिदास" इति चतुरक्षरीश्रवणे संस्कृतभाषाभिज्ञानां निरतिशय आनन्दो बहुमान आदरश्च जायन्ते। संस्कृतसाहित्ये

कृतपरिश्रमाणां सहृदयानां तदीयेषु ग्रन्थतल्लजेषु महान् पक्षपातः स्यादेव; यतोऽसौ महाकविः संस्कारपूताभिर्गीर्भिरनन्यसाध्यं ब्रह्मानन्द-सहोदरमानन्दमनुवाचकेभ्यः प्रदिशति ॥

अयं विशिष्टब्राह्मणकुले लब्धजनिरपि हतविधिवैभवाद् बाल्ये अजपाल एवावर्त्तत; पश्चाद् विदुष्या स्वपत्न्या प्रेरितः कालीं सेवित्वा तत्प्रसादेन महाकविः संवृत्त इति काचन कथा श्रूयते ॥

दृश्य-श्रव्ययोरुभयोरपि काव्यविभागयोरनेन प्रशस्ता ग्रन्था निरमायिषत । श्रव्यविभागे "रघुवंशः", "कुमारसम्भवः", "मेघ-सन्देशः" इति त्रीणि, दृश्ये "शाकुन्तलम्", "विक्रमोर्वशीयम्", "मालविकाग्निमित्रम्" इति त्रीणि काव्यानि च सुप्रसिद्धानि भवन्ति ॥

एतानि काव्यानि सरसमधुराणि व्यवहारावेदकानि, अशिव-नाशकानि, मनोनिर्वृतिदायकानि, कान्तासम्मिततया उपदेशकारीणि च भवन्ति । तत्रापि शाकुन्तलं सर्वोत्तरं भवतीति सर्वसम्मतमेव । श्रूयते च—

" काव्येषु नाटकं श्रेष्ठं तत्र शाकुन्तलं मतम् ।
शाकुन्तले चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥ "

इति । तच्चतुष्टयं च कण्वेन, शकुन्तलायाः पतिगृहं प्रति प्रस्थानावसरे, सन्देशरूपेण, उपदेशरूपेण, आश्रमवासिनां स्वस्य च विकार-प्रदर्शनरूपेण चोक्तानि चत्वारि पद्यान्येवेत्याचक्षते विद्वांसः ॥

मनसि जायमानान् विकारान् विचारांश्च श्रोतॄणां हृदये सरसं सङ्क्रमयितुं सदृशवस्तुप्रदर्शनपूर्वकं प्रतिपादनं नितरामुपयुक्तं हृद्यं च भवति। इदमेव हि उपमालङ्कारेण साध्यते। तादृशोपमाप्रयोगे कालिदासस्यानितरसाधारणं नैपुण्यं दृश्यते। अत एव "उपमा कालिदासस्य" इत्युक्तिः स्थाने भवति॥

"मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥"

इति पद्येन उन्नतकायलभ्यमाम्रादिफलं लिप्सुरुन्नमितबाहुर्ह्रस्व उत्प्लुत्याप्यलभमानो यथा द्रष्टॄणां परिहास्यो भवति तथा काव्यनाटकादिभावनापरिपक्वधिषणैः कवित्ववासनावासितान्तःकरणैरेव साध्यं सत्काव्यनिर्माणं प्रति उत्सुको मन्दमतिरहमपीति वामनोपमानप्रयोगेण सरसया रीत्या प्रतिपाद्यते। एवम्,

"रूपं तदोजस्वि तदेव वीर्यं
तदेव नैसर्गिकमुन्नतत्वम्।
न कारणात् स्वाद् बिभिदे कुमारः
प्रवर्तितो दीप इव प्रदीपात्॥"

इत्यजस्य यौवनवर्णने प्रदीपात् प्रवर्तितेन दीपेनोपमाबन्धस्य चमत्कारातिशयजनकत्वं किमु वक्तव्यं सहृदयानाम्?

तथा इन्दुमत्याः स्वयंवरवर्णनप्रस्तावे इन्दुमती, यं यं राजानम् अतिक्रम्य गता तस्य तस्य वैवर्ण्यप्रतिपादकं,

"सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः ॥ "

इतीदं पद्यमपि उत्तमोदाहरणं भवति । अत्र दीपशिखोपमानस्य सौन्दर्यातिशयेन कालिदासः "दीपशिखाकालिदासः" इति प्रथितो बभूव ॥

कुमारसम्भवे श्रीपार्वत्याः विद्याग्रहणलाघवप्रदर्शने —

" तां हंसमालाः शरदीव गङ्गां
महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले
प्रपेदिरे प्राक्तनजन्मविद्याः ॥ "

इत्युपमाप्रयोगः सहृदयानां हृदयमत्यन्तमावर्जयति । एतावतोपमा-प्रयोगचातुरी दिङ्मात्रमिहोपदर्शिता ॥

विवाहार्थं प्रस्थितं हरं, तृतीयलोचनसर्पादीन् तिलक-कङ्कणादिरूपेण परिणमय्य मन्मथमन्मथं कुर्वाणेन महाकविना "अपारे काव्यसंसारे कविरेकः प्रजापतिः" इति वचनस्य सार्थक्यं बोध्यते । एवं शाकुन्तले चित्ररचनादीनां मालविकाग्निमित्रे नाट्यादीनां वर्णनेन वाचोयुक्तिपटुरसौ सर्वविद्यापारङ्गत इत्यवगन्तु शक्यते ॥

पार्वत्या विद्याप्राप्तिवर्णनेन, मेघे विदुष्या यक्षस्त्रियाः प्रवेशनेन च कवेरस्य स्त्रीविद्याभ्यासतात्पर्यमुक्तप्रायं भवति ॥

यद्यपि कालिदासस्य देशकालावधिकृत्य बहवो विविधानभिप्रायान् प्रकटयन्ति, तथापि विक्रममहाराजस्य सदसि नवरत्नेष्वन्यतम आसीदित्यत उज्जयिन्येवास्यावासभूमिरासीदित्यनुमातुं शक्यते; तथा क्रिस्तोः पूर्वं प्रथमे शतके कालिदासः स्वजीवितेनेमं लोकं पावयामासेत्येव पक्षः साधीयानिति प्रामाणिकानां मतम्। इदानीमप्यसावमृतभारतीकटाक्षाद् यशःशरीरो लोके देदीप्यते च ॥

## परिशीलनम्।

१. विगृह्य वृत्तिनामानि ब्रूत—

(१) द्वीपान्तराणि
(२) धवलीकृतानि
(३) चतुरक्षरी
(४) लिप्सुः
(५) गोव्याघ्रम्
(६) वाचोयुक्तिपटुः

२. व्याकरणकार्याणि ब्रूत—

(१) गृहं प्रति
(२) महाराजस्य
(३) आश्रममधिवसन्तः

३. प्रयोगविपरिणामं कुरुत—

"अनेन ग्रन्था निरमायिषत"।

४. क्रियारूपं पठत—

(१) आचक्षते

५. कालिदासकृतकाव्येषु श्रेष्ठं किमिति सयुक्तिकं वदत।

६. "अपारे काव्यसंसारे कविरेकः प्रजापतिः" इत्यस्य सार्थक्यं प्रदर्शयत॥

---

## द्वितीयः पाठः

## श्रीरवीन्द्रनाथठक्कुरः।

अस्ति भारते पूर्वोत्तरस्यां दिशि कालिघट्टनाम्नी महती नगरी; या वाणिज्यव्यवसायादिभिरितरासां नगरीणां वरिष्ठा लालसीति। तत्र "योरशङ्को" नाम्नि प्रदेशे किञ्चन महासदनं चकास्ति; यच्च महद्भिः पण्डितैः कविभिश्चित्रकारैरितरकलाकारैश्च समलङ्कृतमशोभिष्ट। तत्र महापण्डितस्तत्त्वज्ञानी सिद्धो मताचार्यश्च देवेन्द्रनाथठक्कुरनामा कश्चिद् आसीद्; यश्च महर्षिनाम्ना जनैराहूयते स्म। एकषष्ट्युत्तराष्टशताधिकसहस्रतमे १८६१ क्रिस्ताब्दे मेमासि सप्तमे दिने तस्य भाग्योदय इव चतुर्दशानां पुत्राणामन्तिमो "रवीन्द्रनाथो" जज्ञे॥

स च पित्रादिभिर्लालितः क्रमेण ववृधे। रवीन्द्रस्य सहोदर-भागिनेयौ वयसा किञ्चिदधिकौ सोमेन्द्रसत्यौ क्रीडासखावास्ताम्। तौ काले विद्यालयं प्राविक्षताम्। रवीन्द्रोऽपि ताभ्यां सह विद्यालयं जिगमिषुः गुरुताडनादिरूपविभीषिकां कुर्वाणावपि पितरौ मुहुरनुज्ञार्थी निर्बबन्ध। तस्य इच्छामनुसृत्य कथञ्चन ताभ्यामनुमेने च ॥

विद्यालयं गतवते रवीन्द्राय तत्रत्या बहुविधा निर्बन्धा नारोचन्त। अपि च विद्यालये हौण्या वाण्या अध्यापनं स नासहिष्ट। ज्येष्ठस्य हेमेन्द्रस्य प्रेरणया गुरुषु देशभाषया अध्यापयितुं प्रवृत्तेष्वपि एतादृशात् कलावबोधरहिताद् विद्याभ्यासाद् विरमेयम् इत्येव रवीन्द्रस्य मतिरजायत। कारागारमिव विद्यामन्दिरं रविरमंस्त। अथाप्यसौ गुरुजननिर्बन्धेन कञ्चित्कालं कलाशालास्वध्यैष्ट। लण्डननगरं गत्वा विद्या अधीयानोऽपि रवीन्द्रो विज्ञानसम्पादनायैवास्पृहयत्। न तु केवलं बिरुदाय। बाल्य एव पित्रा साकं हिमवतः प्रान्तप्रदेशेषु सञ्चरन् दृश्यप्रपञ्चसौन्दर्यं दर्शं दर्शं नवं नवमद्भुतं विज्ञानं सम्पादितवान् ॥

रवीन्द्रश्चित्ररचनाचुञ्चुर्ललितकलासक्तश्चाशोभत। बाल्य एव तस्मिन्ननितरसाधारणी कवितावल्ल्यङ्कुरिता क्रमेण प्रवृद्धा पल्लविता मुकुलिता कुसुमिता च अभवत्। सा स्वसौभाग्यपरिमलेन सहृदयभृङ्गानाकृष्य स्वीयं मकरन्दमास्वादयन्ती सुतरामानन्द-सागरे निमज्जयति स्म। साधारणजनानां प्रकृतीश्चित्रीकृत्य बङ्गभाषया बह्व्यो लघुकथा महाकथाः पञ्चविंशतिर्नाटकानि चानेन व्यरच्यन्त।

वङ्गभाषया विरचितमाङ्गल्या स्वयमनूदितं च "गीताञ्जलि" नाम्ना प्रसिद्धं काव्यमेवास्याखिललोकप्रशस्तिं महासाहित्यकारैकलभ्यं "नोबल्" पारितोषिकं च समार्जयत ॥

महाकविरयमसकृत् पाश्चात्येषु पौरस्त्येषु च परिष्कृतराज्येष्वटन् प्रभाषणादिकं कुर्वंश्च बहूनि मित्राणि सम्पादयति स्म ॥

विद्यार्थिनां व्यक्तिगताः शक्तिविशेषाः प्रकाशं प्रवृद्धिं च यादृशेन प्राप्नुयुः विनष्टमदादिदोषास्ते लोकोपकारार्थं प्रवर्तेरंश्च, तादृशेन भाव्यं विद्याभ्यासप्रवर्तनेनेति महाकविरयं दृढमध्यवस्यति स्म ॥

तदर्थं प्रथमतः शान्तिनिकेतनं नाम विद्यास्थानं कल्पितमनेन, यत्र सुपरिष्कृतगुरुकुलविद्याभ्याससरणिरासूत्रिता । तावताप्यसन्तृप्तो रवीन्द्रस्तत्र विश्वभारतीति प्रथितं विश्वविद्यालयं निर्ममे । तत्र द्वीपान्तरेभ्योऽपि पण्डिताः समागत्य बहून् विषयानधिकृत्य चिन्तयन्ति, आशयविनिमयं कुर्वन्ति, मैत्रीबद्धाः प्रतिगच्छन्ति च ॥

कदाचित् चक्रवर्तिना दत्तं "सर्" स्थानमपि विदेशीयापनयमसहमानेन स्वदेशभक्तेन परित्यक्तमनेन । तावद् राष्ट्रियकार्येषु प्रवर्तमानेनाभावि; यावत् सहप्रवर्तकैरक्रममार्गो नान्वसारि ।

अद्यत्व उद्गीयमानं "जनगणमन" इत्यादिदेशीयगानमेतस्य महात्मनः प्रतिभाप्रसर एव॥

एवं महापण्डितः सकलकलावल्लभो लोकोद्धारकः सर्वस्नेही महाकविश्चासौ रवीन्द्रनाथठक्कुरः अशीतितमे वयसि शाश्वते ब्रह्मणि न्यलीयत। हन्त! भारतीयानां दौर्भाग्यविलसितम्। तदात्मनो नित्य-शान्तये वयं प्रार्थयामहे॥

## परिशीलनम्।

१. विगृह्णीत—

(१) सोमेन्द्रसत्यौ
(२) पूर्वोत्तरस्याम्
(३) पितृभ्याम्

२. प्रत्ययार्थान् ब्रूत—

(१) भागिनेयः
(२) जिगमिषुः
(३) चित्ररचनाचुञ्चुः
(४) कुसुमिता

३. व्याकरणकार्याणि वदत—

(१) क्रीडासखौ (२) विरमेयम्

४. वाक्येषु योजयत —

(१) स्म (५) साकम्

(२) सह (६) यावत्-तावत्

(३) अरोचत (७) विना

(४) अस्पृहयत्

५. कर्मणि लकारः प्रयुज्यताम् —

"तौ काले विद्यालयं प्राविक्षताम्"

६. रवीन्द्रस्य बाल्यदशां विवृणुत।

७. रवीन्द्रस्य विद्याभ्यासविषये कीदृशोऽभिप्रायः ?

८. रवीन्द्रः विद्याप्रचाराय किमकुरुत ?

९. रवीन्द्रस्य महत्त्वं प्रतिपादयत।

## तृतीयः पाठः

# लव-चन्द्रकेतुसंवादः।

[लव-चन्द्रकेतू प्रविशतः]

चन्द्रकेतुः—अयि बाल कस्त्वम् ? कस्य वा पुत्रः ?

लवः—अहं कश्चन मुनिकुमार इत्येव मन्यताम्। किमर्थं कुल-नामानि पृच्छसि ? कर्तव्यं निरुद्यताम्।

चन्द्रकेतुः—कः स बालः ? यो वा सप्तद्वीपरक्षिणः तातरामचन्द्रस्य प्रभावमज्ञात्वा, तदीयमश्वं बध्नाति, इति कौतुकेन पृच्छामि।

लवः—किमत्र कौतुकम् ? वीरपुरुषोचितं कृतम्।

चन्द्रकेतुः—अस्तु नाम, किमर्थं वा भवान् तातरामचन्द्रस्य वाजिनमबध्नात् ? अश्वरक्षीणि सैन्यान्यभियोक्तुमुद्युङ्क्ते च।

लवः—इदं तावत् पृच्छामि, सुजनः स राजर्षिः श्रूयते; वयमपि न यागविद्वेषिणः। अस्माकं बहुमतश्च गुणवान् स राजा। एवं स्थिते सकलक्षत्रियाक्षेपि वीरपुरुषासह्यं तादृशं वचनं किमर्थं तुरगरक्षिभिः प्रयुक्तम् ?

चन्द्रकेतुः—किन्तु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः ?

लवः——अस्त्विहामर्षो मास्तु वा, अन्यदेतत् पृच्छामि; दान्तं हि राजानं राघवं शृणुमः; स किल नात्मना दृप्यति नाप्यस्य प्रजा वा दृप्ता जायन्ते। तत् किं मनुष्यास्तस्य राक्षसीं वाचमुदीरयन्ति? ऋषय उन्मत्तदृप्तयोर्वाचं सकलवैरकारणं राक्षसीमाहुः; सूनृतां वाचं तु कामदुघामलक्ष्मीनाशिनीं कीर्तिजननीं शत्रुनाशिनीं मङ्गलकारिणीं चाहुः।

चन्द्रकेतुः——आस्ताम्, पुनः किं वा उपदेष्टव्यं वर्तते?

लवः—न तावदुपदेष्टव्यम्। प्रष्टव्यमेव वर्तते। "किन्तु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः" इत्युक्तं खलु? तत् पृच्छामि किं व्यवस्थितविषयः क्षत्रधर्म इति?

चन्द्रकेतुः——नैव खलु जानासि देवमैक्ष्वाकम्। तद्विरमातिप्रसङ्गात्। जामदग्न्यदमने निर्बन्धं न अर्हसि।

लवः—(सहासम्) अहह! "जामदग्न्यदमनः" इति कोऽयमुच्चैर्वादः? द्विजानां वीर्यं वाच्येव। बाहुवीर्यं तु क्षत्रियाणामेव। गृहीतशस्त्रो ब्राह्मणः पराजित इति महती स्तुतिः।

चन्द्रकेतुः—(सोन्माथमिव) अलमलमुत्तरोत्तरेण। अहो! भवान् नवीनः कश्चिद् पुरुषावतार एव; भार्गवोऽपि यस्य भीरुः। सप्तद्वीपरक्षणनिपुणानि तातचरितान्यपि भवान् न जानाति।

लवः—को हि रघुपतेश्चरितं महिमानं च न जानाति ? यदि नाम किञ्चिदस्ति वक्तव्यम्। (अथवा शान्तम्) अहो! भुज-वीर्यं ताटकावधे प्रदर्शितम्; खररणे पदानि न पश्चात् न्यस्तानि; बालिवधे कौशलं सर्वविदितमेव।

चन्द्रकेतुः—आः तातापवादिन्! भिन्नमर्याद! अति हि नाम प्रगल्भसे ?

लवः—अये मय्येव भ्रुकुटीमुखः संवृत्तः। आस्ताम्, कुमार! कुमार! एह्येहि विमर्दक्षमां भूमिमवतरावः।

[इति निष्क्रान्तौ]

## परिशीलनम्।

१. विग्रहं वदत—

(१) ऐक्ष्वाकम् (२) तदीयम्

२. वाक्ये प्रयुज्यताम्—

अलमलम्

३. क्रियारूपाणि पठत—

(१) अबध्नात् (२) एहि

४. "रघुपतेः"— अत्र व्याकरणकार्यं किम्?

५. राक्षसीसूनृतयोर्वाचोर्भेदः कः?

६. लवो रघुपतेश्चरितं कथमधिक्षिपति ?

## चतुर्थः पाठः

## विष्णुभक्तोऽम्बरीषः।

पुरा किल नभागपुत्रस्य नाभागस्य मूर्तिमान् पुण्यसञ्चय इव पुत्रोऽम्बरीषो नाम राजर्षिरासीत्। स अर्णवमेखलां महीं धर्मेण नीत्या च परिपालयन् प्रकृतीः सर्वा अरञ्जयत्। तस्य भरणेन धात्री सुपुष्टा अभवत्। प्रजाः स्वे स्वे कर्मणि व्यापृताः परस्परमनसूयालवः सुस्निग्धा निरातङ्का निरामयाश्च नितरां मोदन्ते स्म। एवं सर्वथा कुशली स राजा स्वामिनि रमारमणे भक्तिमांश्चासीत् ॥

तदात्वेऽम्बरीषस्याधिपत्यमसहमाना यवनाश्चतुरङ्गबलैः समेताः तमभियोक्तुमुपाक्रमन्त। तत्र च महानाहवः समजनि। शूरेण नृवरेण निशितैः शरैरसिधारया च यवनाः सर्वे यमसदनमनायिषत। यवननाशेन राज्यं निष्कण्टकमकारि च ॥

ततश्च विष्णुप्रसादार्थी राजा कुलगुरोर्वसिष्ठस्याश्रमं प्राप्य सारुन्धतीकस्य तस्य पादावभिवन्द्यैवं व्यजिज्ञपत्— "हे गुरो! विष्णुप्रसादलाभार्थी अहमत्रागमम्। राज्यं तु क्षत्रधर्म इत्येव बिभर्मि; न मे प्रापञ्चिके विषये ईहा; तद् भगवत्प्रसादलाभोपायमुपदिशतु भवान्" इति। वसिष्ठस्तु द्वादशीव्रतानुष्ठानं तदुपायम-

भिधाय तदनुष्ठानप्रकारं चोपादिशत्। सन्तुष्टोऽम्बरीषो गुरुमापृच्छ्य तदनुमत्यैव स्वराजधानीं प्रत्याजगाम ॥

सचिवनिहितराज्यभारः सपत्नीको यमुनोपकण्ठे देदीप्यमानं शीतलतरुच्छायं सुगन्धिकुसुमं च मधुवनं जगाहे। वर्षमेकं द्वादशीव्रतमनुतिष्ठन्तौ तौ दम्पती तद्वनमध्यतिष्ठताम्। सुकुसुमैरर्चयन्तौ स्वरूपं ध्यायन्तौ नामानि सङ्कीर्तयन्तौ च भगवन्तं रमाजानिमुपास्य व्रतमनुतष्ठतुः। विप्रेभ्यो गवां षष्टिकोटिमदातां च ॥

व्रतावसानदिवसे उपोषितौ तौ प्रत्युषसि स्नात्वा महाविष्णुं ध्यायन्तौ पुष्पादिभिः समार्चिचताम्। ततश्च यावदेतौ पारणामचिकीर्षतां तावन्महामुनिर्दुर्वासाः सुलभकोपस्तद्गृहमाजगाम। अथासौ राजा तं मुनिमर्घ्यादिभिर्भक्त्या सम्पूजयामास। उभावपि मिथः कुशलमप्राष्टाम्। राज्ञा च भोजनाय निमन्त्रितः स मुनिः।

परवेदनानभिज्ञः स मन्दं गच्छन् यमुनां प्राप्य यदा स्नानादीनि नित्यकर्माणि विलम्बेन चकार तदा पारणामुहूर्तस्यावसितप्रायत्वाद् राजा किंकर्तव्यतामूढः समजनि। वेलातिक्रमेण व्रतभङ्गभिया पर्याकुलहृदयं वीक्ष्य राजानं विप्रा ऊचुः—"हे राजन्! केवलजलेन पारणाकरणे व्रतभङ्गो न स्याद्; आमन्त्रितातिथिजनस्यानादरश्च न भवेत्; तत्तथा कुरु" इति। तच्छ्रुत्वा राजा विप्राज्ञामन्वसरत् ॥

मन्दं मन्दं प्रत्यागच्छन् स दुर्वासाः ज्ञानचक्षुषा नृपकृतं पारणाविधिं विज्ञाय राजानमुपगम्य संहाररुद्र इव प्रकुपितो ज्वलितचक्षुर्दुर्निरीक्ष्यो भूत्वा "भो भो राजन्! नचिराद् द्रक्ष्यसि त्वमामन्त्रितातिथिजनावमाननस्य फलम्" इत्युच्चैर्जगर्ज। अताडयच्च जटाभिर्भूमिम् ॥

अत्रान्तरे भूमेरुत्थिता सालप्रमाणभुजा करालदंष्ट्रा वृत्तरक्ताक्षी पिङ्गलकेशी खड्गहस्ता पर्वतप्रमाणा कालानल इव जाज्वल्यमाना अट्टहासं कुर्वन्ती कापि कृत्या राज्ञे द्रोग्धुमुद्यताभूत्। अम्बरीषस्तु नेदीयस्या अपि तस्या निर्भीको भगवन्तमेव ध्यायन्नवतस्थे। न तु पदात् पदमपि चचाल ॥

स्वभक्तबाधामभिवीक्ष्य भक्तदासेन भगवता प्रेरितं सुदर्शनचक्रं कृत्याया अपि घोरतरं रूपमादायागम्य कृत्यां भस्मसात्कृत्य दुर्वासोभिमुखं ययौ। सुदर्शनाद् भीतो मुनिरपि प्राणरक्षार्थं सर्वं भूमण्डलं बभ्राम। अलब्धरक्षः स पुनर्ब्रह्माणमुपगम्य चक्राद् रक्षणीयोऽस्मीत्युक्त्वा पादयोः पपात। सुदर्शनाद् रक्षितुं नाहं शक्नोमीति धात्रा प्रत्याख्यातो भीतभीतः स भूयः कण्ठेकालमन्तकरिपुं प्राप्य चक्राद् रक्षामयाचत। ईश्वरेणापि प्रत्याख्यातो वैकुण्ठं प्राप्य रक्षायै विष्णोः पादौ जगृहे ॥

भगवान् विष्णुस्तु "ऋषे! नन्वहं भक्तदासोऽस्मि?; ज्ञानं तपश्च विनयान्वितम् एव मान्यम्; तद् अम्बरीषपदमेव

याहि" इत्यभाणीत्। तावत् समेत्य मुनिना गृहीतपादः समामेकां मुनिं प्रतीक्ष्यानाश्वान् राजा चक्रमुपसृत्य स्तुत्वा निवर्तयामास। यदा चक्रं प्रतिनिवृत्तं तदा स मुनिः प्रहृष्टः कृतागा अपि नृपस्य भगवद्भक्तौ स्थिरतां दयां च प्रशंसन् अशेषा आशिषस्तस्मा अदाच्च। राजा तं सम्भोज्य प्रसन्नं विसृज्य स्वयमभुङ्क्त। ततः पूर्वाधिकया भक्त्या भगवन्तं महाविष्णुमुपास्यान्ते सायुज्यं प्राप च ॥

## परिशीलनम्।

१. विग्रहं दर्शयत—

(१) देदीप्यमानम्
(२) दम्पती
(३) कृतागाः

२. व्याकरणकार्याणि वदत -

(१) उपाक्रमन्त
(२) सुगन्धिः
(३) वर्षमेकम्
(४) रमाजानिः
(५) नचिरात्
(६) रक्ताक्षी
(७) अवतस्थे
(८) कण्ठेकालः

३. वाक्येषु प्रयुज्यन्ताम्——

(१) अध्यतिष्ठत्
(२) घोरतरम्
(३) द्रोग्धुम्
(४) भीतः
(५) अदात्
(६) यदा-तदा।

४. कर्तरि लकारः प्रयुज्यताम्—

"नृवरेण यवना यमसदनम् अनायिषत" ।

५. क्रियारूपाणि पठत—

(१) अकारि (४) अप्राष्टाम्

(२) समजनि (५) अभुङ्क्त

(३) बिभर्मि

६. द्वादशीव्रतानुष्ठानप्रकारं वदत ।

७. दुर्वासाः कुतो राज्ञे अकुप्यत् ?

८. कृत्यारूपं कीदृशम् ?

९. प्रकुपितस्य दुर्वाससः किमभूत् ?

१०. अस्याः कथायाः किमवगम्यते ?

---

पञ्चमः पाठः

## सुभाषितानि ।

रूपयौवनसम्पन्ना
विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते
निर्गन्धाः किंशुका इव ॥ १ ॥

D. P. I. LIBRARY
BANGALORE-29

शोभते विदुषां मध्ये
नैव निर्गुणमानसः ।
अन्तरे तमसां दीपः
शोभते नार्कतेजसाम् ॥ २ ॥

को देशः कानि मित्राणि
कः कालः कौ व्ययागमौ ।
कश्चाहं का च मे शक्ति-
रिति चिन्त्यं मुहुर्मुहुः ॥ ३ ॥

मूर्खाणां पण्डिता द्वेष्या
निर्धनानां महाधनाः ।
व्रतिनः पापशीलानाम्
असतीनां कुलस्त्रियः ॥ ४ ॥

कुलीनैः सह सम्पर्कं
पण्डितैः सह मित्रताम् ।
ज्ञातिभिश्च समं मेलं
कुर्वाणो न विनश्यति ॥ ५ ॥

हस्तस्य भूषणं दानं
सत्यं कण्ठस्य भूषणम् ।

श्रोत्रस्य भूषणं शास्त्रं
किमन्यैः कटकादिभिः ॥ ६ ॥

उदारस्य तृणं वित्तं
शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या
निस्पृहस्य तृणं जगत् ॥ ७ ॥

जनस्याशयमालक्ष्य
यो यथा परितुष्यति ।
तं तथैवानुवर्तेत
पराराधनपण्डितः ॥ ८ ॥

सम्पत्सु महतां चित्तं
भवेदुत्पलकोमलम् ।
आपत्सु च महाशैल-
शिलासङ्घातकर्कशम् ॥ ९ ॥

दोषानपि गुणीकर्तुं
दोषीकर्तुं गुणानपि ।
शक्तो वादी न तत्तथ्यं
दोषा दोषा गुणा गुणाः ॥ १० ॥

## षष्ठः पाठः

# नवरात्रमहोत्सवः ।

आसेतुहिमाचलं सर्वैरपि सनातनमतानुयायिभिर्नरकचतुर्दशी-वावुष्यमाणोऽयं नवरात्रमहोत्सवः । शरदृतावाश्विनमासे शुक्लपक्षे प्रथमादिनवमीपर्यन्ता नव तिथय एव नवरात्रपदेन व्यवह्रियन्ते । तासु तिथिषु क्रियमाणा पराशक्तेः परिचर्या एव नवरात्रमहोत्सव इत्युच्यते । या दीपावलीत्यपरेण नाम्ना विज्ञायते तस्यां नरकचतुर्दश्यां तु न तथा आदरो भवति केरलीयानां यथा नवरात्रे । ऋते केरलीयेभ्यो भारते सर्वेऽपि दीपावलीं सम्यगाघोषयन्ति; परन्तु स आघोष एकाहमेवास्ति; नवरात्रोत्सवस्तु विना देशभेदं भारतीयैः सर्वैरप्याचर्यते ॥

तथा हि यत्र यत्र देवीक्षेत्रं वर्तते तत्र सर्वत्रापि आश्विनशुक्ल-प्रथमामारभ्य आमहानवम्याः एकैकस्मिन्नप्यहनि विशेषपूजाभिर्देवीस्तोत्र-पाठैर्वाद्यादिभिश्च देवीभक्ताः परां शक्तिमुपासते ॥

तत्रापि दुर्गाष्टमीमहानवम्योः विजयदशम्यां च देवीक्षेत्रादन्यत्र गृहादिष्वपि तत्र तत्र मण्डपं निर्माय वेदिं निकषा सोपानानि च कृत्वा पुस्तकानि देवप्रतिमाश्च पङ्क्तिशो निधाय चित्रकर्णैः पटादिवितानै-स्तोरणैः सुगन्धिकुसुमैर्मालाभिर्दीपैश्च सुमनोहरमलङ्कृत्य, दुर्गा,

महालक्ष्मीं, सरस्वतीं चावाह्य पूजयन्ति । सर्वेष्वपि दिवसेषु सरस्वतीरूपिणीं देवीमेव पूजयन्तीत्यादयो बहुविधाः पक्षाः सन्ति । एषु दिनेषु षड्रसोपेतानि मुद्गपृथुकलाजफलपायसादीनि निवेद्यन्ते । यथा पुस्तकानि पूजयन्ति तथा सर्वेऽपि स्वस्वकर्मोपकारकाण्यायुधान्यपि पूजयन्ति; अत एवास्य महस्य "सरस्वतीपूजा" इतिवद् " आयुधपूजा " इत्यपि व्यवहारः समजायत ॥

मैसूर-कालिघट्ट-नेपालादिषु विजयदशमीसहितं दशरात्रमाचर्यत इति "दसरे"त्यपि नामान्तरं समभूत् । तत्र सर्वत्रायमाघोषः प्रदेशान्तरेभ्यो महत्तरो भवति । नगरमेव चित्रवर्णैर्वैद्युतदीपादिभिः कमनीयं संविधायासेचनकं कुर्वन्ति जनाः । अलङ्कृतै रथतुरगगजादिभिः सह जनैः बृहती घोषयात्रा नीयते ॥

पण्डितैः सभाः सम्मेल्यन्ते । बहुविधाः शास्त्रचर्चाः क्रियन्ते । विदेशेभ्योऽपि दसराघोषदर्शनार्थं भूयांसः सन्दर्शकाः आगच्छन्ति निर्गच्छन्ति च । कालिघट्ट-नेपालादिषु दुर्गाष्टमीमहानवम्योरजमहिषादीन् देव्यै बलिं कुर्वन्ति । तथा कृते देवी झटिति प्रसन्नाऽभीष्टानि दद्याद् ; देव्याः कृते यदि हिंस्यात् तर्हि वृजिनं न जायेत; यथा यागादिषु विशसनं न पपाय कल्पेत; इति तेषां विश्वासः ॥

पुरातने काले नरानप्युपहारीकुर्वन्ति स्मेति प्रवादोऽस्ति । अधुनातनास्तु देवीप्रसादार्थं समानजीविनां विशसनमसमीचीनमित्येव मन्वते; तस्मान्मृगबलिकर्मणोऽपि वैरल्यं जातम् ॥

पूजाकाले प्रतिदिनं वेषभूषादिभिरलङ्कृता बालिका गेहाद् गेहं प्रविश्य देवीमभिष्टुवत्यः तत्तद्गेहाद् वितीर्यमाणानि पृथुकापूपादीनि खादं खादं परं मोदन्ते; नृत्यन्ति च। विजयदशम्यां प्रातः स्नानादिना परिपूताः शिष्या गुरवश्च सरस्वतीवरिवस्यातः परं समुदिताः विद्यामारभन्ते ॥

पुरा किल सुदर्शनाख्यो राजा देवीभक्तः सन् नवरात्रव्रतानुष्ठानेन विनष्टपूर्वं स्वीयं राज्यमलब्ध। एवं रावणवधाय प्रस्थातुकामो रामो व्रतमेतदनुष्ठाय देव्यनुगृहीत एव युद्धाय प्रातिष्ठतेत्यादिकथाः पुराविदः कथयन्ति। नवरात्रमहामहोऽयं सर्वाभीष्टसिद्ध्ये कल्पेतेति तदधिष्ठानदेवतां पराशक्तिं वयं सर्वदा भजेमहि ॥

"आपदि किं करणीयं
स्मरणीयं चरणयुगलमम्बायाः।
तत् स्मरणं किं कुरुते
ब्रह्मादीनपि च किङ्करीकुरुते" ॥

## परिशीलनम्।

१. विगृह्णीत —

(१) नवरात्रम् (४) प्रतिदिनम्
(२) षड्रसोपेतानि (५) स्वीयम्
(३) भूयांसः

२. अर्थं लिखत —

(१) आसेचनकम्  (३) वृजिनम्

(२) विशसनम्

३. वाक्येषु योजयत —

(१) ऋते  (३) निकषा

(२) कृते  (४) महत्तरः

४. व्याकरणकार्याणि वदत —

(१) प्रस्थातुकामः  (३) एकाहम्

(२) प्रातिष्ठत

५. को नाम नवरात्रमहोत्सवः ?

६. पराशक्तेः पूजाप्रकारं विशदयत ।

७. "दसरा" पदार्थः कः ?

८. देव्युपासनस्य फलं सोदाहरणं वदत ।

# सप्तमः पाठः

## महामनस्कश्चारुदत्तः

[शकारावुत्तं पालकनामानं राजानं हत्वा तत्स्थाने आर्यकं स्थापयित्वा कृतकृत्यः शर्विलकः पूर्वोपकारं स्मरता आर्यकेण आज्ञप्तः, शकारारोपितवसन्तसेनावधापराधं पालकविहितवधदण्डं चारुदत्तं पूर्वमेव वसन्तसेनासमागमाद् वधदण्डाल्लब्धरक्षमज्ञात्वा तद्रक्षार्थं चारुदत्तमुपगम्य सम्भाषणं करोति इतीदं प्रकरणम् ॥ ]

(प्रविश्य सहसा)

शर्विलकः —

हत्वा कुनृपमहं हि पालकं भो-
स्तद्राज्ये द्रुतमभिषिच्य चार्यकं तम् ।
तस्याज्ञां शिरसि निधाय शेषभूतां
मोक्ष्येऽहं व्यसनगतं च चारुदत्तम् ॥

हत्वा रिपुं तं बलमन्त्रहीनं
पौरान् समाश्वास्य पुनः प्रकर्षात् ।
प्राप्तं समग्रं वसुधाधिराज्यं
राज्यं बलारेरिव शत्रुराज्यम् ॥

(अग्रतो निरूप्य)

भवतु; अत्र तेन भवितव्यम्, यत्रायं जनपदसमवायः। अपि नामायमारम्भः क्षितिपतेरार्यकस्यार्यचारुदत्तस्य जीवितेन सफलः स्यात्? (त्वरिततरमुपसृत्य) अपयात जाल्माः! (दृष्ट्वा सहर्षम्) अपि ध्रियते चारुदत्तः सह वसन्तसेनया? सम्पूर्णाः खल्वस्मत्स्वामिनो मनोरथाः। तत् कृतमहापातकः कथमिवैनमुपसर्पामि? (अथवा) सर्वत्रार्जवं शोभते। (उपसृत्य प्रकाशं बद्धाञ्जलिः) आर्य चारुदत्त!

**चारुदत्तः**—ननु को नु भवान्?

**शर्विलकः**—

येन ते भवनं भित्वा न्यासापहरणं कृतम्।
सोऽहं कृतमहापापस्त्वामेव शरणं गतः॥

**चारुदत्तः**—सखे! मैवम्; त्वयासौ प्रणयः कृतः। (इति कण्ठे गृह्णाति)

**शर्विलकः**—अन्यच्च।

आर्यकेणार्यवृत्तेन कुलं मानं च रक्षता।
पशुवद् यज्ञवाटस्थो दुरात्मा पालको हतः॥

**चारुदत्तः**—किम्?

**शर्विलकः**—

त्वद्यानं यः समारुह्य गतस्त्वां शरणं पुरा।
पशुवद् वितते यज्ञे हतस्तेनाद्य पालकः॥

**चारुदत्तः**— शर्विलक! योऽसौ पालकेन घोषादानीय निष्कारणं कूटागारे बद्ध आर्यकनामा त्वया मोचितः ?

**शर्विलकः**—यथाह तत्रभवान्।

**चारुदत्तः**—प्रियं नः प्रियम्।

**शर्विलकः**—प्रतिष्ठितमात्रेण तव सुहृदा आर्यकेणोज्जयिन्यां वेणातटे कुशावल्यां राज्यमतिसृष्टम्। तत् प्रतिमान्यतां प्रथमः सुहृत्प्रणयः। (परिवृत्य नेपथ्याभिमुखमवलोक्य) अरे रे! आनीयतामयं पापी राष्ट्रियशठः।

(नेपथ्ये)

यथाज्ञापयति शर्विलकः।

**शर्विलकः**—आर्य नन्वयमार्यको राजा विज्ञापयति—"इदं मया युष्मद्गुणोपार्जितं राज्यम्; तदुपयुज्यताम्"।

**चारुदत्तः**—अस्मद्गुणोपार्जितं राज्यम्?

(नेपथ्ये)

अरे रे राष्ट्रियस्यालक! एह्येहि। स्वस्याविनयस्य फलमनुभव।

(ततः प्रविशति पुरुषैरधिष्ठितः पश्चाद् बाहुबद्धः शकारः)

**शकारः**—आश्चर्यम्।

एवं दूरमतिक्रान्त उद्दाम इव गर्दभः।
आनीतः खल्वहं बद्धः कुक्कुरोऽन्य इव दुष्करः॥

(दिशोऽवलोक्य) समन्तत उपस्थित एष राष्ट्रियबन्धः । तत् कमिदानीमशरणः शरणं व्रजामि ? (विचिन्त्य) भवतु, तमेवाभ्युपपन्नशरणवत्सलं गच्छामि। (उपसृत्य) आर्य चारुदत्त ! परित्रायस्व परित्रायस्व। (इति पादयोः पतति)

(नेपथ्ये)

आर्य चारुदत्त ! मुञ्च मुञ्च, व्यापादयामैतम्।

**शकारः**—(चारुदत्तं प्रति) भो अशरणशरण ! परित्रायस्व।

**चारुदत्तः**–(सानुकम्पम्) अहह ! अभयमभयं शरणागतस्य।

**शर्विलकः**—(सावेगम्) आः ! अपनीयतामयं चारुदत्तपार्श्वात्।

(चारुदत्तं प्रति) ननूच्यतां किमस्य पापस्य अनुष्ठीयतामिति।
आकर्षन्तु सुबध्वैनं श्वभिः सङ्खाद्यतामथ।
शूले वा तिष्ठतामेष पाट्यतां क्रकचेन वा॥

**चारुदत्तः**—किमहं यद् ब्रवीमि तत् क्रियते ?

**शर्विलकः**—कोऽत्र सन्देहः ?

**शकारः**—भट्टारक ! चारुदत्त ! शरणागतोऽस्मि। तत् परित्रायस्व परित्रायस्व। यत्तव सदृशं तत् कुरु; पुनर्नेदृशं करिष्यामि।

(नेपथ्ये)

पौराः ! व्यापादयत, किन्निमित्तं पातकी जीव्यते ?

[वसन्तसेना वध्यमालां चारुदत्तस्य कण्ठादपनीय शकारस्योपरि क्षिपति]

**शकारः**—गर्भदासीपुत्रि ! प्रसीद प्रसीद। न पुनर्मारयिष्यामि, तत् परित्रायस्व।

**शर्विलकः**—अरे रे ! अपनयत। आर्य चारुदत्त ! आज्ञाप्यताम्—किमस्य पापस्यानुष्ठीयताम् ?

**चारुदत्तः**—किमहं यद् ब्रवीमि तत् क्रियते ?

**शर्विलकः**—कोऽत्र सन्देहः ?

**चारुदत्तः**—सत्यम् ?

**शर्विलकः**—सत्यम्।

**चारुदत्तः**—यद्येवं शीघ्रमयम्........

**शर्विलकः**—किं हन्यताम् ?

**चारुदत्तः**—नहि नहि, मुच्यताम्।

**शर्विलकः**—किमर्थम् ?

**चारुदत्तः**—

शत्रुः कृतापराधः शरणमुपेत्य पादयोः पतितः।
शस्त्रेण न हन्तव्यः,

**शर्विलकः**—एवम्, तर्हि श्वभिः खाद्यताम्।

**चारुदत्तः**—नहि,

उपकारहतस्तु कर्तव्यः ॥

**शर्विलकः**— अहो आश्चर्यम्! किं करोमि? वदत्वार्यः।

**चारुदत्तः**— तन्मुच्यताम्।

**शर्विलकः**— मुक्तो भवतु।

**शकारः**— आश्चर्यम्। प्रत्युज्जीवितोऽस्मि।

[इति पुरुषैः सह निष्क्रान्तः।]

## परिशीलनम्।

१. *"तिष्ठताम्"— अत्र व्याकरणकार्यं किम्?

२. शर्विलककृतं महापातकं किम्?

३. चारुदत्तस्य महामनस्कतां स्पष्टयत।

४. प्रयोगविनिमयं कुरुत—

(१) "सोऽहं कृतमहापापस्त्वामेव शरणं गतः"।

(२) "आर्यकेणार्यवृत्तेन दुरात्मा पालको हतः"।

५. किमहं यद् ब्रवीमि तत् क्रियते "—

अधोऽङ्कितानां पदानां स्थाने एकपदं प्रयुज्यताम्।

---

*शूलं निर्णेतृत्वेनाश्रयतु इत्यर्थः। "प्रकाशनस्थेयाख्ययोश्च" इत्यात्मनेपदम्।

## अष्टमः पाठः

### सुभाषितानि ।

रत्नैर्महाब्धेस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद् विरमन्ति धीराः ॥ १ ॥

दानं भोगो नाश-
स्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते
तस्य तृतीया गतिर्भवति ॥ २ ॥

अज्ञः सुखमाराध्यः
सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं
ब्रह्मापि नरं न रञ्जयति ॥ ३ ॥

वदनं प्रसादसदनं
सदयं हृदयं सुधामुचो वाचः ।
करणं परोपकरणं
येषां केषां न ते वन्द्याः ॥ ४ ॥

सुखस्य दुःखस्य न कोऽपि दाता
परो ददातीति कुबुद्धिरेषा ।
अहं करोमीति वृथाभिमानः
स्वकर्मसूत्रग्रथितो हि लोकः ॥ ५ ॥

यः सुन्दरस्तद्वनिता कुरूपा
या सुन्दरी सा पतिरूपहीना ।
यत्रोऽभयं तत्र दरिद्रता च
विधेर्विचित्राणि विचेष्टितानि ॥ ६ ॥

साहित्यसङ्गीतकलाविहीनः ।
साक्षात् पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमान-
स्तद् भागधेयं परमं पशूनाम् ॥ ७ ॥

मन्निन्दया यदि जनः परितोषमेति
नन्वप्रयासजनितोऽयमनुग्रहो मे ।
श्रेयोर्थिनो हि पुरुषाः परतुष्टिहेतोः
क्लेशार्जितान्यपि धनानि परित्यजन्ति ॥ ८ ॥

तृष्णां छिन्धि, भज क्षमां, जहि मदं,
पापे रतिं मा कृथाः,
सत्यं ब्रूह्य, नुयाहि साधुपदवीं,
सेवस्व विद्वज्जनान्,

मान्यान् मानय, विद्विषोऽप्यनुनय,
ह्याच्छादय स्वान् गुणान्,
कीर्तिं पालय, दुःखिते कुरु दया-
मेतत् सतां लक्षणम् ॥ ९ ॥

सन्तः सच्चरितोदयव्यसनिनः
प्रादुर्भवद्यन्त्रणाः
सर्वत्रैव जनापवादचकिता
जीवन्ति दुःखं सदा ।
अव्युत्पन्नमतिः कृतेन न सता
नैवासता व्याकुलो
कृत्याकृत्यविवेकशून्यहृदयो
धन्यो जनः प्राकृतः ॥ १० ॥

# रघुवंशे सप्तमसर्गस्य अनुबन्धः।

पद्यम् (1) (I) बभूव. भूधातोर्लिट् परस्मैपदम्--

| | | |
|---|---|---|
| बभूव | बभूवतुः | बभूवुः |
| बभूविथ | बभूवथुः | बभूव |
| बभूव | बभूविव | बभूविम। |

(II) भावे— बभूवे।

(III) पूर्वं हि ब्रह्मणा निर्मिते देवसेनादैत्यसेने इन्द्रकन्ये अभूताम्। तयोः पूर्वस्याः पतित्वे स्कन्दोऽभिषिक्त इत्यागमः।

प. (2) (I) जग्मुः. गम्धातोर्लिट् परस्मैपदम् —

| | | |
|---|---|---|
| जगाम | जग्मतुः | जग्मुः |
| जगमिथ / जगन्थ | जग्मथुः | जग्म |
| जगाम / जगम | जग्मिव | जग्मिम। |

(II) कर्मणि — जग्मे।

(III) **भोज्यां** प्रति — प्रतिशब्दयोगे द्वितीया।

प. (3) (I) शशाम. शम्धातोर्लिट् परस्मैपदम्—

| | | |
|---|---|---|
| शशाम | शेमतुः | शेमुः |
| शेमिथ | शेमथुः | शेम |
| शशाम / शशम | शेमिव | शेमिम । |

(II) भावे—शेमे।

(III) स्वयंवरविघातकाः शच्या विनाश्यन्त इत्यागमः

प. (4) (I) प्राप. प्र + आप्धातोर्लिट् परस्मैपदम्—

| | | |
|---|---|---|
| प्राप | प्रापतुः | प्रापुः |
| प्रापिथ | प्रापथुः | प्राप |
| प्राप | प्रापिव | प्रापिम । |

(II) कर्मणि— प्रापे।

(III) वध्वा सह— सहार्थयोगे तृतीया।

(IV) ध्वजानां छाया = ध्वजच्छायम् । पूर्वपदार्थस्य बाहुल्ये गम्ये छायान्तस्तत्पुरुषः नपुंसकं स्यात् ।

प. (7) (I) ततान. तनुधातोर्लिट् परस्मैपदम् —

| | | |
|---|---|---|
| ततान | तेनतुः | तेनुः |
| तेनिथ | तेनथुः | तेन |
| ततान / ततन | तेनिव | तेनिम । |

(II) कर्मणि—तेने ।

(III) गवां किरणानाम् अक्षीव गवाक्षः गो इत्यत्र । ओकारस्य अव इत्यादेशः, अक्षि इत्यत्र इकारस्य अकारादेशश्च भवति ।

प. (8) (I) ययौ. याधातोर्लिट् परस्मैपदम्—

| | | |
|---|---|---|
| ययौ | ययतुः | ययुः |
| ययिथ / ययाथ | ययथुः | यय |
| ययौ | ययिव | ययिम । |

(II) कर्मणि—ययें ।

प. (9) (I) आसीत् असधातोर्लङ् परस्मैपदम्—

| | | |
|---|---|---|
| आसीत् | आस्ताम् | आसन् |
| आसीः | आस्तम् | आस्त |
| आसम् | आस्व | आस्म । |

(II) भावे—अभूयत अभूयेताम् अभूयन्त ।

प. (12) (I) अमंस्त मन्धातोर्लुङ् आत्मनेपदम्—

| | | |
|---|---|---|
| अमंस्त | अमंसाताम् | अमंसत |
| अमंस्थाः | अमंसाथाम् | अमन्ध्वम् |
| अमंसि | अमंस्वहि | अमंस्महि । |

कर्तरि---भोज्या स्वयंवरं साधुम् अमंस्त।

कर्मणि—भोज्यया स्वयंवरः साधुः अमानि।

लभेत. लभ्धातोर्लिङ् आत्मनेपदम्--

| | | |
|---|---|---|
| लभेत | लभेयाताम् | लभेरन् |
| लभेथाः | लभेयाथाम् | लभेध्वम् |
| लभेय | लभेवहि | लभेमहि। |

कर्तरि— असौ कान्तं लभेत।

कर्मणि—अमुया कान्तः लभ्येत।

(II) अक्ष्णः परं = परोक्षम्। परेत्यस्य स्थाने परो इति अक्षि इत्यस्य स्थाने अक्ष इति अक्ष इत्यत्र पूर्वाकारस्य लोपश्च भवति। परोक्षम् एषाम् अस्ति इति परोक्षाः तैः परोक्षैः। अर्श आद्यच्।

प• (13) (I) अयोजयिष्यत्, अभविष्यत्. णिजन्ताद् युज्धातोः, भूधातोश्च, "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" इति लृङ् परस्मैपदम्—

(II) कर्तरि—प्रजानां पतिः इदं द्वन्द्वं न अयोजयिष्यद्।
प्रजानां पत्युः प्रयत्नः विफलः अभविष्यत्।
कर्मणि – प्रजानां पत्या इदं द्वन्द्वं न अयोजयिष्यत।
भावे-- प्रजानां पत्युः प्रयत्नेन विफलेन अभाविष्यत।

प. (14) अभूत्. भूधातोर्लुङ् परस्मैपदम्——

| | | |
|---|---|---|
| अभूत् | अभूताम् | अभूवन् |
| अभूः | अभूतम् | अभूत |
| अभूवम् | अभूव | अभूम। |

भावे——अभावि।

प. (15) (I) समाससाद. सम्+आ+सद्धातोर्लिट् परस्मैपदम्——

| | | |
|---|---|---|
| आससाद | आसेदतुः | आसेदुः |
| आसेदिथ | आसेदथुः | आसेद |
| आससाद / आससद | आसेदिव | आसेदिम। |

(II) पौर्यश्च ताः वध्वश्च=पौरवध्वः। पौरीत्यस्य पुंवद्भावात् पौरेति सिद्धम्।

(III) कर्मणि——समासेदे।

प. (16) विवेश. विश्धातोर्लिट् परस्मैपदम्——

| | | |
|---|---|---|
| विवेश | विविशतुः | विविशुः |
| विवेशिथ | विविशथुः | विविश |
| विवेश | विविशिव | विविशिम। |

भावे——विविशे।

५. (17) (I) जग्राह. ग्रहधातोर्लिट् परस्मैपदम्—

| | | |
|---|---|---|
| जग्राह | जगृहतुः | जगृहुः |
| जग्रहिथ | जगृहथुः | जगृह |
| जग्राह / जग्रह | जगृहिव | जगृहिम । |

(II) कर्मणि—जगृहे ।

(III) **वनिताकटाक्षैः** सार्धम्—सहार्थयोगे तृतीया ।

५. (18) (I) निन्ये. नीधातोर्लिट् आत्मनेपदम्----

| | | |
|---|---|---|
| निन्ये | निन्याते | निन्यिरे |
| निन्यिषे | निन्याथे | निन्यिध्वे |
| निन्ये | निन्यिवहे | निन्यिमहे । |

(II) कर्मणि— अवरोधरक्षैः सः वधूसमीपं निन्ये ।
कर्तरि-- अवरोधरक्षाः तं वधूसमीपं निन्युः ।

५. (19) (I) सङ्गमयाञ्चकार. सम् + गम् + णिच् + आम् + कृ-
धातोर्लिट् परस्मैपदम्----

| | | |
|---|---|---|
| सङ्गमयाञ्चकार | सङ्गमयाञ्चक्रतुः | सङ्गमयाञ्चक्रुः |
| सङ्गमयाञ्चकर्थ | सङ्गमयाञ्चक्रथुः | सङ्गमयाञ्चक्र |
| सङ्गमयाञ्चकार / सङ्गमयाञ्चकर | सङ्गमयाञ्चकृव | सङ्गमयाञ्चकृम |

(II) कर्मणि—सङ्क्रमयाञ्चक्रे ।

(III) ईषदसमाप्तः अग्निः=अग्निकल्पः । साक्षाद् द्रष्टा साक्षी। साक्षिणः कर्म भावः वा साक्ष्यम् ।

प. (20) (I) चकाशे. काश्धातोर्लिट् आत्मनेपदम्—

| | | |
|---|---|---|
| चकाशे | चकाशाते | चकाशिरे |
| चकाशिषे | चकाशाथे | चकाशिध्वे |
| चकाशे | चकाशिवहे | चकाशिमहे । |

(II) भावे — चकाशे ।

प. (21) (I) संववृते. सम्+वृत्धातोर्लिट् आत्मनेपदम्—

| | | |
|---|---|---|
| संववृते | संववृताते | संववृतिरे |
| संववृतिषे | संववृताथे | संववृतिध्वे |
| संववृते | संववृतिवहे | संववृतिमहे । |

(II) भावे — संववृते ।

प. (22) आनशिरे. अश्धातोर्लिट् आत्मनेपदम्—

| | | |
|---|---|---|
| आनशे | आनशाते | आनशिरे |
| आनशिषे | आनशाथे | आनशिध्वे |
| आनशे | आनशिवहे | आनशिमहे । |

कर्मणि—आनशे ।

प. (24) (I) चकार. कृधातोर्लिट् परस्मैपदम्----

| | | |
|---|---|---|
| चकार | चक्रतुः | चक्रुः |
| चकर्थ | चक्रथुः | चक्र |
| चकार / चकर | चकृव | चकृम । |

(II) कर्मणि----चक्रे।

प. (25) (I) उदियाय. उद्+इधातोर्लिट् परस्मैपदम्----

| | | |
|---|---|---|
| उदियाय | उदीयतुः | उदीयुः |
| उदिययिथ / उदियेथ | उदीयथुः | उदीय |
| उदियाय / उदियय | उदीयिव | उदीयिम । |

(II) कर्मणि----ईये।

प्रपेदे. प्र+पद्धातोर्लिट् आत्मनेपदम्---

| | | |
|---|---|---|
| प्रपेदे | प्रपेदाते | प्रपेदिरे |
| प्रपेदिषे | प्रपेदाथे | प्रपेदिध्वे |
| प्रपेदे | प्रपेदिवहे | प्रपेदिमहे । |

कर्मणि---प्रपेदे ।

प. (26) बहुव्रीह्यन्तर्भूतः अक्षिशब्दः अकारान्तः स्यात् ।
समाकुले अक्षिणी यस्य तत् = समाकुलाक्षम् ।

प. (29) (I) समादिदेश. सम्+आ+दिश्धातोर्लिट् परस्मैपदम्—

| | | |
|---|---|---|
| समादिदेश | समादिदिशतुः | समादिदिशुः |
| समादिदेशिथ | समादिदिशथुः | समादिदिश |
| समादिदेश | समादिदिशिव | समादिदिशिम । |

(II) कर्तरि—राजा अधिकृतान् समादिदेश ।
कर्मणि—राज्ञा अधिकृताः समादिदिशिरे ।

प. (30) (I) तस्थौ. स्थाधातोर्लिट् परस्मैपदम्—

| | | |
|---|---|---|
| तस्थौ | तस्थतुः | तस्थुः |
| तस्थिथ / तस्थाथ | तस्थथुः | तस्थ |
| तस्थौ | तस्थिव | तस्थिम । |

(II) भावे—तस्थे ।

प. (31) (I) प्रास्थापयत्. प्र+स्था+णिच् लङ् परस्मैपदम्—
अभवदितिवत् ।

(II) कर्मणि—प्रास्थाप्यत

(III) अन्वगात्. अनु + इ (गा) लुङ् परस्मैपदम्—

| | | |
|---|---|---|
| अन्वगात् | अन्वगाताम् | अन्वगुः |
| अन्वगाः | अन्वगातम् | अन्वगात |
| अन्वगाम् | अन्वगाव | अन्वगाम । |

(IV) कर्मणि – अन्वगायि ।

प. (32) (I) अपावर्तत. अप + वृत्धातोर्लङ् आत्मनेपदम्—
ऐधत, अवन्दत इत्यादिवत् ।

(II) **अजेन** सार्धम्—सहार्थयोगे तृतीया ।

(III) तिस्रः **वसतीः** उषित्वा—अत्यन्तसंयोगे कालवाचिनो द्वितीया । तिसृषु रात्रिषु अविच्छेदेन वासः अभवदित्यर्थः ।

प. (33) चक्षमे. क्षम्धातोर्लिट् आत्मनेपदम्—

| | | |
|---|---|---|
| चक्षमे | चक्षमाते | चक्षमिरे । |

प्रपेदे इतिवत् ।

प. (34) (I) रुरोध. रुध्धातोर्लिट् परस्मैपदम्—

| | | |
|---|---|---|
| रुरोध | रुरुधतुः | रुरुधुः |
| रुरोधिथ | रुरुधथुः | रुरुध |
| रुरोध | रुरुधिव | रुरुधिम । |

(II) बलिना दत्तां श्रियं स्वीकुर्वाणं त्रिविक्रमसम्बन्धिपादं प्रह्लादः रुरोध इति काचन कथा ब्रह्माण्डपुराणे उक्ता ।

प. (35) (I) प्रत्यग्रहीत्, प्रति + ग्रहधातोर्लुङ् परस्मैपदम् —

| | | |
|---|---|---|
| प्रत्यग्रहीत् | प्रत्यग्रहीष्टाम् | प्रत्यग्रहीषुः |
| प्रत्यग्रहीः | प्रत्यग्रहीष्टम् | प्रत्यग्रहीष्ट |
| प्रत्यग्रहीषम् | प्रत्यग्रहीष्व | प्रत्यग्रहीष्म । |

(II) कर्तरि----कुमारः पार्थिववाहिनीं प्रत्यग्रहीत् ।
कर्मणि----कुमारेण पार्थिववाहिनी प्रत्यग्राहि ।

प. (37) **उदीरयन्ति** स्म--स्मयोगे भूते लट् स्यात् ।
उच्चारयामासुरित्यर्थः ।

प. (39) (I) बभुः भाधातोर्लिट् परस्मैपदम् —ययावितिवत् ।
(II) भावे----बभे ।

प. (43) (I) निजघ्नुः, नि + हन्धातोर्लिट् परस्मैपदम्--

| | | |
|---|---|---|
| निजघान | निजघ्नतुः | निजघ्नुः |
| निजघनिथ / निजघन्थ | निजघ्नथुः | निजघ्न |
| निजघान / निजघन | निजघ्निव | निजघ्निम । |

(II) कर्तरि---रथस्थाः तान् एव निजघ्नुः ।
कर्मणि--रथस्थैः ते एव निजघ्निरे ।

प. (45) (I) पेतुः पत्धातोर्लिट् परस्मैपदम्—
ततान इतिवत् ।

पपात पेततुः पेतुः ।

(II) भावे---पेते ।

प. (48) (I) रराज. राज्धातोर्लिट् परस्मैपदम्——

| | | |
|---|---|---|
| रराज | रराजतुः / रेजतुः | रराजुः / रेजुः |
| रराजिथ / रेजिथ | रराजथुः / रेजथुः | रराज / रेज |
| रराज | रराजिव / रेजिव | रराजिम / रेजिम |

(II) भावे - रेजे ।

प. (50) (I) ददर्श. दृश्धातोर्लिट् परस्मैपदम्---

| | | |
|---|---|---|
| ददर्श | ददृशतुः | ददृशुः |
| ददर्शिथ / दद्रष्ठ | ददृशथुः | ददृश |
| ददर्श | ददृशिव | ददृशिम । |

(II) कर्मणि ददृशे ।

प. (54) (I) निवर्त्येत. नि + वृत्धातोर्ण्यन्तात् सम्भावनायां कर्मणि लिङ् आत्मनेपदम्----

| | | |
|---|---|---|
| निवर्त्येत | निवर्त्येयाताम् | निवर्त्येरन् |
| निवर्त्येथाः | निवर्त्येयाथाम् | निवर्त्येध्वम् |
| निवर्त्येय | निवर्त्येवहि | निवर्त्येमहि । |

(II) कर्मणि----समीरणेन धूमः निवर्त्येत

कर्तरि----समीरणः धूमं निवर्तयेत् ।

(III) परेण बले भग्ने सत्यपि=यदा परेण बलं भग्नं तदा अपि ।

प. (55) पुरा किल कल्पावसाने वेलातिक्रमेण समुद्रजले मग्नां भूमिं विष्णुः वराहावतारेण उद्धृतवानिति कथा अत्रानुसन्धेया ।

प. (56) कर्मणि—जनैः सः अलक्ष्यत ।

कर्तरि—जनाः तं अलक्षयन् ।

कर्तरि—मौर्वी बाणान् सुषुवे ।

कर्मणि—मौर्व्या बाणाः सुषुविरे ।

प. (57) (I) तस्तारः स्तृधातोर्लिट् परस्मैपदम्----

| | | |
|---|---|---|
| तस्तार | तस्तरतुः | तस्तरुः |
| तस्तर्थ | तस्तरथुः | तस्तर |
| तस्तार / तस्तर | तस्तरिव | तस्तरिम । |

(II) कर्तरि---सः गां तस्तार ।

कर्मणि---तेन गौः तस्तरे ।

प. (58) (I) प्रजह्रुः. प्र + हृधातोर्लिट् परस्मैपदम्--

| | | |
|---|---|---|
| प्रजहार | प्रजह्रतुः | प्रजह्रुः |
| प्रजहर्थ | प्रजह्रथुः | प्रजह्र |
| प्रजहार / प्रजहर | प्रजह्रिव | प्रजह्रिम । |

(II) कर्तरि----भूमिपालाः तस्मिन् प्रजह्रुः ।

कर्मणः अधिकरणत्वविवक्षया सप्तमी। तं प्रजह्रुरित्यर्थः

भावे----भूमिपालैः तस्मिन् प्रजह्रे ।

५. (60) (I) प्रायुङ्क्त. प्र+युज्धातोर्लङ् आत्मनेपदम्—

| | | |
|---|---|---|
| प्रायुङ्क्त | प्रायुञ्जाताम् | प्रायुञ्जत |
| प्रायुङ्थाः | प्रायुञ्जाथाम् | प्रायुङ्ध्वम् |
| प्रायुञ्जि | प्रायुञ्ज्वहि | प्रायुञ्ज्महि । |

(II) कर्तरि—कुमारः अस्त्रं प्रायुङ्क्त।
कर्मणि—कुमारेण अस्त्रं प्रायुज्यत।

(III) प्रियंवदनामकाद् गन्धर्वात् सम्मोहनं नाम अस्त्रं लब्धमिति पञ्चमसर्गे उक्तम्।

५. (62) (I) दध्मौ. ध्माधातोर्लिट् परस्मैपदम्—

| | | |
|---|---|---|
| दध्मौ | दध्मतुः | दध्मुः |
| दध्मिथ / दध्माथ | दध्मथुः | दध्म |
| दध्मौ | दध्मिव | दध्मिम । |

(II) कर्तरि—कुमारः जलजं दध्मौ ।
कर्मणि—कुमारेण जलजं दध्मे ।

५. (66) (I) पश्य. दृश् (पश्य्) धातोर्लोट् परस्मैपदम्—

| | | |
|---|---|---|
| पश्यतु / पश्यतात् | पश्यताम् | पश्यन्तु |
| पश्य / पश्यतात् | पश्यतम् | पश्यत |
| पश्यानि | पश्याव | पश्याम । |

प्रार्थ्यसे. प्र + अर्थधातोर्णिजन्तात् कर्मणि लट्
आत्मनेपदम्—

प्रार्थ्यते प्रार्थ्येते प्रार्थ्यन्ते ।
एधते इतिवत् ।

(II) कर्तरि— त्वं परान् पश्य ।
कर्मणि——त्वया परे दृश्यन्ताम् ।
कर्तरि——इमे त्वां प्रार्थयन्ते ।
कर्मणि——एभिः त्वं प्रार्थ्यसे ।

५. (69) (I) उदवहत्. उद् + वह्धातोर्लङ् परस्मैपदम्—
अभवदितिवत् ।

(II) कर्तरि---सः ताम् उदवहत् ।
कर्मणि --तेन सा उदौह्यत ।

---

## सुभाषितस्थक्रियारूपाणि ।

(१) भुङ्क्ते. भुज्धातोर्लट् आत्मनेपदम्---

भुङ्क्ते भुञ्जाते भुञ्जते
भुङ्क्षे भुञ्जाथे भुङ्ग्ध्वे
भुञ्जे भुञ्ज्वहे भुञ्ज्महे ।

(२) ददाति. दाधातोर्लट् परस्मैपदम्—

| | | |
|---|---|---|
| ददाति | दत्तः | ददति |
| ददासि | दत्थः | दत्थ |
| ददामि | दद्वः | दद्मः । |

(३) एति. इधातोर्लट् परस्मैपदम् —

| | | |
|---|---|---|
| एति | इतः | यन्ति |
| एषि | इथः | इथ |
| एमि | इवः | इमः । |

(४) छिन्धि. छिद्धातोर्लोट् परस्मैपदम् —

| | | |
|---|---|---|
| छिनत्तु<br>छिन्तात् | छिन्ताम् | छिन्दन्तु |
| छिन्धि<br>छिन्तात् | छिन्तम् | छिन्त |
| छिनदानि | छिनदाव | छिनदाम । |

(५) जहि. हन्धातोर्लोट् परस्मैपदम्--

| | | |
|---|---|---|
| हन्तु<br>हतात् | हताम् | घ्नन्तु |
| जहि<br>हतात् | हतम् | हत |
| हनानि | हनाव | हनाम । |

(६) मा कृथाः. कृधातोर्लुङ् आत्मनेपदम् —

| | | |
|---|---|---|
| अकृत | अकृषाताम् | अकृषत |
| अकृथाः | अकृषाथाम् | अकृढ्वम् |
| अकृषि | अकृष्वहि | अकृष्महि । |

निषेधार्थकमाङः योगे लुङ् अडागमनिषेधः च स्याताम् ।

(७) ब्रूहि. ब्रूधातोर्लोट् परस्मैपदम्—

| | | |
|---|---|---|
| ब्रवीतु / ब्रूतात | ब्रूताम् | ब्रुवन्तु |
| ब्रूहि / ब्रूतात् | ब्रूतम् | ब्रूत |
| ब्रवाणि | ब्रवाव | ब्रवाम । |

(८) अनुयाहि. अनु+याधातोर्लोट् परस्मैपदम्—

| | | |
|---|---|---|
| यातु / यातात् | याताम् | यान्तु |
| याहि / यातात् | यातम् | यात |
| यानि | याव | याम । |

(९) कुरु. कृधातोर्लोट् परस्मैपदम्----

| | | |
|---|---|---|
| करोतु<br>कुरुतात् | कुरुताम् | कुर्वन्तु |
| कुरु<br>कुरुतात् | कुरुतम् | कुरुत |
| करवाणि | करवाव | करवाम । |

★ ★ ★

DHARMARAM LIBRARY

BANGALORE-560 029

| Due Date | Due Date | Due Date |
| --- | --- | --- |

DVK Library
*11010035*
T38 K45

COVER PRINTED BY THE S.G.P. AT THE GOVERNMENT PRESS,
TRIVANDRUM, 1962.

# KERALA READER SANSKRIT

(Academic Schools)

## Standard IX

1963

1962

T38
K45

Indic Digital Archive Foundation
gpura.org